**DHARMASASTRA**

**ACHARYA 2nd YEAR**
**Course/Paper-9**

# PART - A

# मीमांसापरिभाषा (कृष्णयज्वकृता) सम्पूर्णा ।

## *Mīmāṃsāparibhāṣā (kṛṣṇayajvakṛtā) sampūrṇā*

तमसो मा ज्योतिर्गमय

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
(केन्द्रीयविश्वविद्यालयः)


**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

प्रथमग्रन्थिः(UNIT-I to UNIT-V )

# आमुखम्

भारते दर्शनस्योत्पत्तिः वेदकाल एवाभवत् । वेदसंहितायामङ्कुरितं दर्शनमुपनिषत्काले पल्लवितं सञ्जातम् । तदनन्तरं सूत्रकाले दर्शनद्रुमः शाखाभेदेन बहुधा विभक्तः । तत्र स्थूलरूपेण दर्शनानि नास्तिक- आस्तिकभेदेन द्विविधानि भवन्ति । नास्तिकदर्शनेषु चार्वाकदर्शन- बौद्धदर्शन- जैनदर्शनानि अन्तर्भवन्ति। आस्तिकदर्शनेषु वैशेषिकदर्शन- न्यायदर्शन- सांख्यदर्शन - योगदर्शन - मीमांसादर्शन- वेदान्तदर्शनानि अन्तर्भवन्ति ।

१) चार्वाकदर्शनं - चार्वाकाः परलोकं न मन्यन्ते। शरीरमेवात्मानं स्वीकुर्वन्ति। अस्यापरं नाम लोकायतदर्शनम्। दर्शनमिदं बृहस्पतिना प्रणीतमिति उच्यते । परन्तु दर्शनस्यास्य न कश्चन मौलिकग्रन्थो विद्यते ।

२) बौद्धदर्शनम् - गौतमबुद्धेन प्रणीतमिदं दर्शनम् । दर्शनमिदं वैभाषिक- सौत्रान्तिक - योगाचार- माध्यमिकभेदैः चतुर्धा विभज्यते । बौद्धदर्शनस्य भागद्वयं वर्त्तते । धार्मिको भागः, दार्शनिको भागश्च । अत्र दार्शनिकभागे तार्किकदृष्ट्या बौद्धसिद्धान्तस्य सूक्ष्मविचारः कृतोऽस्ति ।

३) जैनदर्शनम् - महावीरेण प्रणीतमिदं दर्शनम् । जैनसाहित्यमतिविपुलम् । स्याद्वादो जैनदर्शनस्य प्रधानवादः।

४) वैशेषिकदर्शनम् - आस्तिकदर्शनेषु वैशेषिकदर्शनं प्राचीनम् । दर्शनस्यास्य प्रणेता कश्यपवंशोत्पन्नः कणादः । दर्शनेऽस्मिन् दशाध्यायाः, ३७० सूत्राणि च वर्त्तन्ते । निःश्रेयसमस्य शास्त्रस्य मुख्यं प्रतिपाद्यम्। अस्य दर्शनस्य प्रमुखभाष्यकारः प्रशस्तपादः ।

५) न्यायदर्शनम् - दर्शनस्यास्य प्रवर्त्तकः सूत्रकारश्च महर्षिगौतमः। अस्यापरं नाम पदार्थमीमांसाशास्त्रम् । अस्य प्रमुखः भाष्यकारः वात्स्यायनः। न्यायदर्शनं पञ्चाध्यायैः विभक्तम् । प्रत्यध्यायमाह्निकद्वयं च विद्यते । अत्र प्रमाण-प्रमेय-संशय- प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास- छल-जाति-निग्रहस्थानाख्याः षोडशपदार्थाः निरूपिताः।

६) सांख्यदर्शनम् - सांख्यदर्शनस्याद्य आचार्यः महर्षिकपिल आसीत् । सांख्यदर्शनस्य मूलतत्त्वं भवति पञ्चविंशतितत्त्वानि । सांख्यदर्शने षडध्यायाः, ५६७ सूत्राणि च विद्यन्ते । अस्य प्रमुखाचार्याः आसुरि- पञ्चशिख- माठराचार्य - ईश्वरकृष्ण - विज्ञानभिक्षु - वाचस्पतिमिश्रादयः भवन्ति । प्रकृति - पुरुषयोः विवेचनं, जगत्स्वरूपं, सृष्टिक्रमः, पुरुषबहुत्वं, प्रामाण्यवादः, अपवर्गः, जीवन्मुक्तिः, विदेहमुक्तिश्चेत्येते प्रमुखप्रतिपाद्यविषयाः भवन्ति ।

७) योगदर्शनम् - योगदर्शनस्य प्रवर्त्तकः महर्षिपतञ्जलिः। योगश्चित्तवृत्तिनिरोधः । योगदर्शने चत्वारः पादाः, १९५ सूत्राणि च सन्ति । पातञ्जलयोगदर्शने व्यासः

महत्त्वपूर्णं भाष्यग्रन्थं प्रणीतवान् । योगदर्शने कैवल्यरूपं परमप्रयोजनं प्रतिपादितम् । हिरण्यगर्भः योगस्य वक्ता इति याज्ञवल्क्यः प्रतिपादयति ।

८) वेदान्तदर्शनम् - वेदान्तदर्शनस्य सूत्रकर्त्ता महर्षिव्यास आसीत् । वेदान्तदर्शनस्य सूत्रग्रन्थः ब्रह्मसूत्रनाम्नोच्यते । ब्रह्मसूत्रे चत्वारोऽध्यायाः, प्रत्यध्यायश्च चत्वारः पादाः सन्ति। अत्र शङ्करमतानुसारं ५५५ सूत्राणि, १९९ अधिकरणानि च सन्ति । जीवात्म-परमात्मनोः साक्षात्कारः वेदान्तदर्शनस्य परमप्रतिपाद्यः ।

९) मीमांसादर्शनम् - मीमांसा नाम पूज्यविचारः । मीमांसादर्शनस्य प्रवर्त्तकः महर्षिजैमिनिरासीत् । धर्मस्य प्रतिपादनमेव मीमांसायाः मुख्यं प्रयोजनम् । अस्यापरं नाम कर्ममीमांसा । परम्परया यथाऽन्ये महर्षयः चर्चितानां विषयाणामुपस्थापनं सूत्ररूपेण कृतवन्तः, तथैवासौ महर्षिजैमिनिः न्यायनिबन्धनात्मकमतिविस्तृतं मीमांसादर्शनं सूत्राकारेणोपस्थापयामास । मीमांसाशास्त्रमिदं महासागरोपमम्, अतिगम्भीरञ्च । कालान्तरे दर्शनस्यास्य तत्त्वं मनस्यालोडयन्तः शबराचार्य-कुमारिल-पार्थसारथि-खण्डदेव-भवदेव-सोमेश्वर-प्रभाकर-शालिकनाथ-भवनाथप्रभृतयः आचार्याः शास्त्रमि-दमतिविस्तृतं कृतवन्तः । मीमांसाशास्त्रसरण्यां प्रवेशाय मण्डनमिश्र- माधव-कमलाकरभट्टप्रभृतयः लघुग्रन्थान् प्रणीतवन्तः । तेषां सर्वेषां ग्रन्थानां याथार्थ्यप्रकाशनाय भाष्यटीकादिपरम्परया मीमांसातत्त्वप्रकाशनानि दिव्यानि ग्रन्थरत्नानि प्रादुर्भूतानि ।

पूर्वमीमांसादर्शने द्वादशाध्यायाः विलसन्ति । अत एव मीमांसादर्शनं द्वादशलक्षणीशास्त्रनाम्ना प्रथितमस्ति । दर्शनेऽस्मिन् २६४४ सूत्राणि, ९०९ अधिकरणानि च सन्ति । तत्र प्रत्यध्यायं प्रतिपादितविषयाः यथा - प्रथमाध्याये धर्मप्रमाणम्, द्वितीये विधायकवचनानां विनियोगः, तृतीये शेषशेषिभावः, चतुर्थे क्रत्वर्थपुरुषार्थविचारः, पञ्चमे श्रुत्यर्थपाठादिक्रमबोधकप्रमाणानि, षष्ठे अधिकारसम्पत्तिः, सप्तमे सामान्या-तिदेशविचारः, अष्टमे विशेषातिदेशः, नवमे ऊहविचारः, दशमे बाधः, एकादशे तन्त्रम्, द्वादशे प्रसङ्गश्चेति। मध्ये मध्ये चान्ये शब्दार्थविध्यर्थवादसम्बन्धा-दयोऽवान्तरविषयाः सङ्गृहीताः ।

मीमांसापरिभाषारूपस्य ग्रन्थस्य कर्त्ता भवति श्रीमान् कृष्णयज्वामहोदयः । अत्र सरलया भाषया मनोहरया शैल्या च मीमांसातत्त्वानि प्रतिपादितानि सन्ति । आकारेण ग्रन्थोऽयं लघुरपि विषयातिशयेन संयुतः गभीरार्थकः प्रकरणप्रतिपादकश्च । ग्रन्थस्यास्य प्रणेता महामीमांसकः श्रौतपरम्परानिष्णातः श्रीकृष्णयज्वामहाशयः मीमांसातत्त्वजिज्ञासूनां कृते मीमांसापरिभाषां रचितवान् । श्रीकृष्णयज्वनः पिता सूर्यनारायणः, माता च त्रिपुरसुन्दरी चास्ताम् । अत्र स्वयं ग्रन्थकारः श्लेषालङ्कारेण स्वजनकेन साकं सकललोकप्रणम्यं श्रीसूर्यदेवं तथा त्रिपुरसुन्दरीं स्वजननीं तथा त्रिपुरासुन्दरीशब्दवाच्यां ललितादेवीं निरन्तरमभिवन्दनं करोति । प्राप्तार्थान् जैमिनिप्रभृतीन् मीमांसाशास्त्र-प्रबन्धकान् श्रीकृष्णयज्वा निरन्तरं प्रणामाध्ययनादिद्वारा सेवते ।

# प्रथमखण्डः-ग्रन्थारम्भात्-परिसंख्याविधिनिर्णयपर्य्यन्तम्

संरचना

१.१. प्रस्तावना
१.२. उद्देश्यानि
१.३. धर्माधर्मनिरूपणम्
१.४. वेदद्वैविध्यम्
१.५. ब्राह्मणवाक्यभेदा:
१.६. प्रयोगविधि:
१.७. फलापूर्वकल्पना
१.८. उत्पत्त्यपूर्वकल्पना
१.९. यजिपदाश्रवणेऽपि यागविधानम्
१.१०. लिङ्प्रत्ययाद्यभावेऽपि विधिकल्पना
१.११. त्रिकापूर्वाद्युत्पत्ति:
१.१२. विधिभेदा:

## १.१. प्रस्तावना

मीमांसापरिभाषाया: कर्त्ता श्रीकृष्णयज्वा ग्रन्थादाविष्टदेवान् सूर्यनारायणं त्रिपुरसुन्दरीञ्च स्तौति। अपरपक्षे स्वजनकं सूर्यनारायणं जननीं त्रिपुरसुन्दरीञ्च प्रणमति । तत: गुरून् सततं प्रणम्य ग्रन्थं प्रारभते । प्रशस्तमतिशालिनामधीतसर्वशास्त्राणामपि अनधीतमीमांसाशास्त्राणां मीमांसाशास्त्रीयसिद्धान्तीभूतपदार्थानां सूक्ष्मतया बोधाय कृष्णयज्वाभिधानेन इयं मीमांसापरिभाषा क्रियते । विषयप्रारम्भे स: आस्तिकशास्त्राणां सार्थकतानिमित्तं धर्मस्य निरूपणं करोति । तत्र वेदबोधितेष्टसाधनताको धर्म इति धर्मलक्षणं प्रस्तूय तस्योदाहरणं प्रददाति । धर्माधर्मयो: निरूपणं कृत्वा धर्मस्य त्रीणि प्रमाणानि ग्रन्थकार: उपस्थापयति ।

श्रुति: धर्मनिमित्तं परमं प्रमाणं भवति । तस्याश्च श्रुते: भेदप्रकल्पनं कृत्वा मन्त्रब्राह्मणयो: वेदनामधेयमिति वेदस्य द्वैविध्यमत्र प्रतिपादितम् । मन्त्ररूपस्य वेदस्योपयोग: प्रयोगकाल एव भवति । ब्राह्मणवाक्यानि यागरूपं विधिं प्रतिपादयन्ति। ब्राह्मणवाक्यानि च षड्विधानि भवन्ति । तेषां सर्वेषां ब्राह्मणवाक्यानां लक्षणोदाहरणानि तदनु प्रतिपाद्यन्ते । तत: परं प्रयोगविधे: विश्लेषणात्मकं प्रतिपादनमत्र क्रियते । विधे: स्वरूपप्रतिपादनेन साकं तस्य त्रैविध्यमत्र विचारितमस्ति ।

## १.२. उद्देश्यानि

अस्मिन् पाठ्यांशे निम्नोक्ता: ध्यानबिन्दव: भवन्ति । यथा -

- मीमांसाशास्त्रस्य द्वादशलक्षणीनाम्ना प्रतिपादनविषये भवन्त: जानीयु: ।
- धर्मस्वरूपविषये भवद्भि: ज्ञायेत ।
- वेदस्य मन्त्ररूप-ब्राह्मणरूपभेदज्ञानं भवतां भवेत् ।
- ब्राह्मणवाक्यानां सोदाहरणं भेदं भवन्त: ज्ञातुं शक्नुवन्ति ।
- त्रिविधविधिविचारश्च भवद्भि: ज्ञात: स्यात् ।

## १.३. धर्माधर्मनिरूपणम्

मीमांसासूत्रकृता महर्षिजैमिनिना 'अथातो धर्मजिज्ञासा' इति प्रथमसूत्रादारभ्य 'अन्वाहार्ये च दर्शनात्' इत्यन्ता द्वादशलक्षणी द्वादशाध्यायविशिष्टा च पूर्वमीमांसा प्रणीता । मीमांसाशास्त्रीयद्वादशेषु अध्यायेषु धर्मप्रमाणादारभ्य प्रसङ्गश्चेति क्रमेण द्वादशलक्षणानि प्रतिपादितानि सन्ति । अस्मिन् मीमांसाशास्त्रे अनुष्ठेय: धर्म:, अननुष्ठेयोऽधर्म विचारिते स्त: । मीमांसाशास्त्रे 'यागादिरेव धर्म:' इत्युक्तत्वात् याग-होम-दानानामेव धर्मत्वं, कलञ्जभक्षणादीनामधर्मत्वञ्च प्रतिपादितम् । अतस्तयो: धर्माधर्मयोरनुष्ठानोपयोगित्वमत्र विचारितमस्ति । धर्माधर्मविचारस्योपयोग: धर्मानुष्ठाने अधर्मत्यागे च भवति। अतस्तौ विचारितौ । मीमांसापरिभाषाकार: कृष्णयज्वा भाट्टमतानुयायित्वाद् 'यागादिरेव धर्म:' इति प्रतिजानीते । तत्र धर्माधर्मयोर्निरूपणे धर्मस्य लक्षणं तावत् 'वेदबोधितेष्टसाधनताको धर्म:' इति । स्वर्गफलं यागेन सम्पादयेत् इति शाब्दबोधो भवति । अत्र यागस्य इष्टसाधनता वेदेन ज्ञायत इति यागात्मके धर्मे लक्षणसमन्वय: । स्वर्गात्मकस्य फलस्य स्वयमेवेष्टरूपत्वात् तत्फलं साध्यरूपमस्ति । तच्च इष्टस्य साधनं नास्ति । अत: धर्मलक्षणस्य स्वर्गात्मके फलेऽतिव्याप्तिप्रसङ्गो न भवति ।

अधर्मलक्षणं यथा प्रतिपादितम् - 'वेदबोधितानिष्टसाधनताकोऽधर्म:' । उदाहरणं यथा -कलञ्जभक्षणादि:। अनिष्टसाधनत्वमात्रोक्तौ विषभक्षणेन, अपथ्यसेवनेन चानिष्टमुत्पद्यते । वेदबोधित-त्वमात्रोक्तौ नरकादावतिव्याप्ति: । नरक: स्वयमेवानिष्टरूप:, नहि अनिष्टसाधनरूप: । अत एव कष्टात्मके तस्मिन् पुरुषनिवृत्तिरुपपद्यते। कलञ्जभक्षणादिरिति आदिपदेन सुरापानादिकं बोद्धव्यम् । अनेन कलञ्जभक्षणं निषिद्ध्यते । अत: कलञ्जभक्षणमधर्म: ।धर्माधर्मयोर्ज्ञानविषये श्रुति:(वेद:), स्मृति:, आचारश्च प्रमाणम् । अत्र श्रुति-स्मृति-सदाचारेषु श्रुति: स्वतन्त्रं प्रमाणम् । इतरयो: स्मृत्याचारयो: प्रामाण्यं तु श्रुतिमूलकत्वेन मन्तव्यम् । स्मृत्याचारयोर्विरुद्धा श्रुतिर्यदि उपलभ्यते तदा स्मृत्याचारयोरप्रमाणं भवेत् । वेदानुकूलौ स्मृत्याचारावेव प्रमाणमिति उक्तत्वात् ।एवं च श्रुति-स्मृति-सदाचाराणामेव धर्माधर्मयो: प्रामाण्यं स्वीक्रियते । इति ।

स्वानुशीलनप्रश्नाः
१) द्वादशलक्षणीशास्त्रं किम् ?
उत्तरं– ................................................
२) अधर्मस्य किं लक्षणम् ?
उत्तरं– ................................................

## १.४. वेदद्वैविध्यम्

श्रुतिस्मृतिसदाचारात्मकेषु त्रिषु धर्मप्रमाणेषु प्रथमं स्वतन्त्रं च प्रमाणं भवति श्रुतिः। तस्याः द्वौ विभागौ स्तः। मन्त्रः, ब्राह्मणश्चेति । अनुष्ठानकाले अनुष्ठेयस्यार्थस्य स्मारणमेव मन्त्राणामुपयोगः। तच्च मन्त्रस्वरूपमग्रे वक्ष्यते । अन्यप्रमाणैरज्ञातस्यार्थस्य यद् विधानं करोति अर्थात् कर्त्तव्यतां बोधयति तदेव वाक्यं ब्राह्मणमित्युच्यते । विधायकवाक्यरूपस्य ब्राह्मणस्य यः शेषः सोऽर्थवादो विज्ञेयः। एषाञ्च अर्थवाद–वाक्यानां ब्राह्मण एवान्तर्भावः। ब्राह्मणस्यैवान्यतमो भागोऽर्थवादः। इदमर्थवादवाक्यं विधिप्रतिपादितस्यार्थस्य प्राशस्त्यं विज्ञाप्य विधिवाक्येन सह एकवाक्यतां प्राप्नोति । अतस्तस्यार्थवादवाक्यस्य प्रामाण्यं भवति ।

## १.५. ब्राह्मणवाक्यभेदाः

ब्राह्मणवाक्यं षड्विधम् । ते भवन्ति यथा –

१) कर्मोत्पत्तिवाक्यम् ।
२) गुणवाक्यम् ।
३) फलवाक्यम् ।
४) फलाय गुणवाक्यम् ।
५) सगुणकर्मोत्पत्तिवाक्यम् ।
६) सफलकर्मोत्पत्तिवाक्यञ्च ।

**१) कर्मोत्पत्तिवाक्यम् –** येन वाक्येन केवलं 'इदं कर्म कर्त्तव्यम्' इत्येव प्रतिपाद्यते । फलसम्बन्धादिकमन्यत् किमपि न प्रतिपाद्यते, तद्वाक्यं कर्मोत्पत्तिवाक्यमिति विज्ञेयम् । उदाहरणं यथा – अग्निहोत्रं जुहोति । अनेन वाक्येन अग्निहोत्रहोमः कर्त्तव्यरूपेण विधीयते । अत इदं वाक्यं कर्मोत्पत्तिवाक्यमित्युच्यते ।

**२) गुणवाक्यम् –** प्रमाणान्तरेण प्राप्तं कर्मोद्दिश्य अङ्गरूपेण द्रव्यस्य देवतायाः वा विधानं येन वाक्येन क्रियते तद्वाक्यं गुणवाक्यमित्युच्यते । उदाहरणं यथा – 'दध्ना जुहोति' इति । अनेन गुणवाक्येन अग्निहोत्रहोममुद्दिश्य दधिरूपस्य गुणस्य विधानं क्रियते । अतः 'दध्ना जुहोति' इति वाक्यं गुणवाक्यमित्युच्यते। किञ्चित् कर्म उद्दिश्य अङ्गत्वेन यद् विधीयते तद्गुणशब्देनोच्यते । उक्तोदाहरणे दधि द्रव्यपदार्थः,अग्निहोत्रसंज्ञकस्य होमस्य गुणोऽस्ति ।

मूले होममुद्दिश्य इत्युक्तत्वादुद्देश्यस्यान्यान् धर्मान् कथयति । अत्र होमस्योद्देश्यत्वं नाम प्रमाणान्तरावगतस्य पदार्थस्य पुनरन्येन विधेयेन सह सम्बन्धं कर्तुं निर्देशः इति उद्देश्यस्य स्वरूपम् । 'दध्ना जुहुयात्' अत्र वाक्ये धात्वर्थो

होमस्तादृशोऽस्तीति तस्योद्देश्यत्वम् । प्रमाणान्तरेण ज्ञातस्य होमस्य पुनर्वाक्यान्तरेण कथनं नाम अनुवादः इति अनुवादस्य स्वरूपम् । 'अग्निहोत्रं जुहोति' इति वाक्येन ज्ञातस्य होमस्य 'दध्ना जुहुयात्' इति वाक्यान्तरेण पुनरभिहितत्वाद् 'दध्ना जुहोती'ति वाक्ये होमः अनुवाद्यो भवति। पुनस्तस्यैव होमस्य दध्यादिगुणैः सह सम्बन्धः इति प्रधानस्य स्वरूपम् । यथा 'दध्ना जुहुयात्' इत्यत्र दध्यात्मकस्य गुणस्यान्वयो होमक्रियायां भवतीति होमः प्रधानम् । अतस्तत्र क) उद्देश्यत्वम्,ख) अनुवाद्यत्वम्, ग) प्राधान्यं चेति त्रयो धर्माः भवन्ति । इमे त्रयो धर्माः उद्देश्यगतं त्रिकमित्युच्यते ।

केनाप्यन्यप्रमाणेन दध्नः अप्राप्तत्वाद् 'दध्ना जुहोति' इत्यस्मिन् वाक्ये दध्नः विधेयत्वम् । तच्च दधि होमसाधनत्वात् तत्र होमनिरूपितं गुणत्वमस्ति । होमकर्त्ता च होमानुष्ठानार्थं तद्दधि स्वीकरोति । अतस्तत्र उपादेयत्वं भवति । 'अज्ञातज्ञाप्यत्वं विधेयत्वम्' । अनवगतः पदार्थो येन वाक्येनाभिधीयते, सः पदार्थस्तस्य वाक्यस्य विधेयो भवति । यश्च विधेयो भवति, तत्र विधेयत्वधर्मस्तिष्ठति । 'दध्ना जुहुयात्' इति वाक्यात् पूर्वं दधि होमसाधनमित्यनवगतमासीत् । 'दध्ना जुहुयात्' इति वाक्यदर्शनेनैव दध्नो होमसाधनत्वमवगम्यते । यो यस्योपकारको भवति, स तस्य गुणो भवति । तत्र च गुणत्वं धर्मः । दधनि होमनिरूपितं गुणत्वं तिष्ठति । यतो हि दधि होमोपकारकमस्ति । अनुष्ठीयमानत्वमुपादेयत्वम् । कञ्चित् पदार्थमुद्दिश्य यस्य पदार्थस्यानुष्ठानं क्रियते, स पदार्थः उपादेयो भवति । तत्र चोपादेयत्वधर्मस्तिष्ठति । अतः दधि उपादेयमस्ति । अस्मिन् वाक्ये दधिपदार्थे क) विधेयत्वं, ख) गुणत्वं, ग) उपादेयत्वं चेति त्रयो धर्माः सन्ति । एते धर्माः विधेयगतत्रिकशब्देनोच्यन्ते ।

३) **फलवाक्यम् –** कर्मोत्पत्तिवाक्यादवगतस्य कर्मणः फलाकाङ्क्षायां सत्यां तस्य कर्मणः फलेन सह सम्बन्धमभिधीयमानो विधिः फलविधिरित्युच्यते। उदाहरणं यथा – '**अग्निहोत्रं जुहुयात् स्वर्गकामः**' इति । अनेन वाक्येन यः स्वर्गं कामयते स स्वर्गप्राप्तिसाधनभूताग्निहोत्रनामकं होमं भावयेत् । अतः अग्निहोत्रवाक्यावगतस्य कर्मणः स्वर्गफलेन सह सम्बन्धः प्रतिपादितः । अत इदं फलवाक्यमित्युच्यते ।

४) **फलाय गुणवाक्यम् –** प्राप्तं कर्माश्रित्य फलोद्देश्येन गुणस्य विधायकं वाक्यं 'फलाय गुणवाक्यम्' इत्युच्यते।उदाहरणं यथा – 'दध्नेन्द्रियकामस्य जुहुयात्' इति । अनेनाग्निहोत्रहोमविधायकेन वाक्येन विहितं होममाश्रित्य इन्द्रियरूपफलोद्देशेन दधिरूपस्य गुणस्य विधानं कृतमस्ति । तेन 'दध्नेन्द्रियकामस्य जुहुयात्' इति वाक्यानुसारं होमस्य साधनीभूतेन दध्ना इन्द्रियरूपं फलं सम्पादयेत् । इदं फलाय गुणवाक्यमेव गुणफलविधिरित्युच्यते ।

५) **सगुणकर्मोत्पत्तिवाक्यम् –** यस्मिन् वाक्ये द्रव्यदेवतादिगुणैर्विशिष्टस्य कर्मणः विधानं भवति, तद्वाक्यं सगुणकर्मोत्पत्तिवाक्यमित्युच्यते । उदाहरणं यथा – 'सोमेन यजेत' इति । अनेन वाक्येन सोमलतारूपद्रव्य-युक्तस्य यागस्य विधानं भवति । विशिष्टस्य विधाने सति विशेषणस्य विधानमर्थादेव भवति । विशेषणस्य विधानार्थं

कस्यापि वाक्यान्तरस्य आवश्यकता न भवति । 'सोमेन यजेत' इत्यत्र सोमविशिष्टस्य यागस्य विधानमस्ति । तेन विशेषणरूपस्य सोमस्यापि विधानं स्वत एव जातम् । सोमो गुणः, यागश्चापूर्व इति उभयमपि 'सोमेन यजेत' इत्यनेनैव वाक्येन विधीयते । अतोऽयं विशिष्टविधिः ।

६) **सफलकर्मोत्पत्तिवाक्यम् –** क्वचित् कर्मोत्पत्तिवाक्यमेव फलसम्बन्धबोधकमपि भवति । तच्च सफलकर्मोत्पत्तिवाक्यमिति उच्यते । उदाहरणं यथा – 'उद्भिदा यजेत पशुकामः' इति । अस्मिन् वाक्ये उद्भित्संज्ञकस्य यागस्योत्पत्तिवाक्ये पशुरूपफलस्य सम्बन्धोऽपि बोधितोऽस्ति । अत इदं वाक्यं पशुरूपफलसहितस्य यागस्य विधायकं वर्त्तते। उद्भिन्नामकोऽयं यागः एतद्वाक्यातिरिक्तेनान्येन केनापि वाक्येन न विधीयते । पशुरूपफलप्राप्तेः साधनतया यागस्य विधायकम् । अत्र न केवलं यागः विधीयते, परन्तु फलसाधनविशिष्टो यागो विधीयते ।

स्वानुशीलनप्रश्नाः

१) यस्मिन् वाक्ये द्रव्यं प्रतिपाद्यते, तद्वाक्यं किं नामधेयम् ?

उत्तरं– ................................................

२) फलवाक्येन किं ज्ञायते ?

उत्तरं– ................................................

## १.६. प्रयोगविधिः

मीमांसाशास्त्रे चत्वारो विधयो निर्दिष्टाः सन्ति । यथा – १) उत्पत्तिविधिः, २) विनियोगविधिः, ३) अधिकारविधिः, ४) प्रयोगविधिश्चेति । तत्र कर्मस्वरूपमात्रप्रकाशकः 'अग्निहोत्रं जुहोति' इत्याकारकः उत्पत्तिविधिः । अङ्गताप्रकाशकं 'दध्ना जुहोति' इति वाक्यं विनियोगविधिः । कर्मानुष्ठाने कर्त्तुरधिकारप्रकाशकं 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति वाक्यमधिकारविधिः । कर्मोत्पत्तिवाक्यं, सगुणकर्मोत्पत्तिवाक्यं, सफलकर्मोत्पत्तिवाक्यं चोत्पत्तिविधिरेव । गुणवाक्यं, फलाय गुणवाक्यं च विनियोगविधिरेव । फलवाक्यञ्चाधिकारविधिः । इदानीमवशिष्टस्य प्रयोगविधेः निरूपणं क्रियते । प्रधानस्य कर्मणो विधिः प्रधानविधिरित्युच्यते । प्रधानकर्मोपकारकस्योपकरणस्य विधायको विधिः अङ्गविधिरित्युच्यते । अङ्गविधिवाक्यैः सह एकवाक्यतामवाप्य महावाक्यतां लभमानः प्रधानविधिरेव सम्पूर्णाङ्गविशिष्टस्य प्रधानकर्मणो विधायको भवतीति कृत्वा स एव प्रयोगविधिरित्युच्यते । उदाहरणं यथा – 'अग्निहोत्रं जुहुयात् स्वर्गकामः'इत्यस्मात् प्रधानविधिबोधकाद्वाक्याद् 'अग्निहोत्रहोमेन स्वर्गं सम्पादयेत्' इत्यर्थः प्रतीयते । अनेन सूचितं यत् प्रधानविधिवाक्यस्य अङ्गविधिवाक्येन सह एकवाक्यताकरणे आकांक्षा आवश्यकी भवति ।

फलविधेरुदाहरणप्रदर्शनावसरे स्वर्गं कामयमानेन पुरुषेण अग्निहोत्रहोमः कर्त्तव्य इत्यर्थो वर्णितः। परन्त्वत्र अग्निहोत्रहोममनुष्ठाय स्वर्गः कथं सम्पादनीयः ? एवं कथम्भावाकाङ्क्षा अथवा इतिकर्त्तव्यताकाङ्क्षा जायते । यथा – 'कुठारेण द्वैधीभावं कुर्यात्' इत्युक्ते सति केन प्रकारेण द्वैधीभावं कुर्यादिति आकांक्षा उत्पद्यते । तदा कुठारस्य उद्यमनं निपातनं च कृत्वा द्वैधीभावः कर्त्तव्यो भवतीति ज्ञायते । तथैवात्र अग्निहोत्रप्रकरणे 'गार्हपत्यात् आहवनीय – दक्षिणाग्निकुण्डयोरग्निरानेयः' । 'अग्नौ च समिधः प्रक्षेपणीयाः' इत्यादिभिः पठितैरङ्गविधिभिः येषां विधानं कृतमस्ति । एतादृशैः अग्निप्रणयन-समिदाधान-आयतनशोधनादीनामङ्गानां साहाय्येनाग्नौ होमस्यानुष्ठानं कृत्वा स्वर्गः सम्पादनीयः । एतादृशस्य प्रधानकर्मणः इतिकर्त्तव्यताकाङ्क्षावशात् कल्पितामे-कवाक्यतामवलम्ब्य स्वर्गनिमित्तं सर्वाङ्गयुक्तस्याग्निहोत्रकर्मणो विधानं भवतीति कृत्वाऽयं प्रयोगविधिरित्युच्यते । प्रधानकर्मणोऽङ्गसमूह एव इत्थंभावशब्देन इतिकर्त्त-व्यताशब्देन वोच्यते । अत्र 'अग्निहोत्रहोमः' प्रधानं कर्म, अग्निप्रणयनादिकं च तस्यैव प्रधानकर्मणोऽङ्गभूतं विद्यते । एवं च 'कुठारेण द्वैधीभावं कुर्यात्'इति प्रधानवाक्यस्य 'कुठारमुद्यच्छति', 'कुठारं निपातयति' इत्यादिभिरङ्गवाक्यैः सह आकांक्षाबलेन परस्परान्वये सति एकवाक्यतायां सत्याम् 'उद्यमननिपातनादिक्रियायुक्तेन कुठारेण काष्ठस्य द्वैधीभावं कुर्यात्' इति महावाक्यं निष्पद्यते । कथंभावाकाङ्क्षायां सत्यां प्रधानविधिसमीपस्थितैरङ्गविधिभिः सहैकवाक्यता भवति । अन्यप्रकरणस्थि-तैरङ्गविधिवाक्यैः सह एकवाक्यता न भवति ।

स्वानुशीलनप्रश्नाः

१) मीमांसाशास्त्रे कति विधयः निर्दिष्टाः सन्ति ?

उत्तरं- ........................................

२) सफलकर्मोत्पत्तिवाक्यं कस्मिन् विधावन्तर्भवति ?

उत्तरं- ........................................

## १.७. फलापूर्वकल्पना

'अग्निहोत्रं जुहुयात् स्वर्गकामः' अर्थात् अग्निहोत्रकर्मणा स्वर्गः सम्पादनीयः इति यदुक्तं, तदनुपपन्नत्वात् न सम्भवति इति शङ्कामुत्थापयति ग्रन्थकारः । यागादिकर्मणां क्षणिकत्वात् मरणानन्तरं स्वर्गनरकादीनां प्राप्तौ तत्कर्म कथं कारणं भवेत् ? अर्थात् अग्निहोत्रादिकर्म, स्वर्गादिफलानां साधनमिति कथनमनुचितं प्रतीयते । यतो हि 'कार्यनियतपूर्ववृत्तिर्कारणम्' इति कारणस्य लक्षणम् । एतल्लक्षणानुसारेण कारणस्य कार्यपूर्वक्षणे स्थितिरावश्यकी । अतोऽयं निरूपितः साध्यसाधनभावोऽयुक्तियुक्त इति शङ्कां ग्रन्थकर्त्ता उपस्थापयति।

**समाधानम् –** अत्र साध्यसाधनभावस्यानुपपत्तिर्नास्ति । यतो हि शास्त्रविहितानि निषिद्धानि वा कर्माणि तत्तत्फलसाधनानीति तत्तद्वाक्यैरवबुध्य क्षणिकानां कर्मणां कालान्तरभाविफलसाधनत्वसिद्ध्यर्थं कर्मफलयोर्मध्ये पुण्यरूपस्य पापरूपस्य वाऽपूर्वस्य कल्पना क्रियते । अपूर्वस्य कल्पनाकरणेन यागादिकर्माणि क्षणिकान्यपि स्वजन्यापूर्वद्वारा फलसाधनानि भवन्ति, न साक्षात् । इदमेवापूर्वं फलापूर्वशब्देनोच्यते । पूर्वोत्तराङ्गयुक्तं प्रधानकर्मैव तस्य फलापूर्वस्य जनकं भवति । पूर्वोत्तराङ्गरहितं प्रधानकर्म, फलापूर्वस्य जनकं न भवितुमर्हति । केवलं प्रधानकर्मैव फलापूर्वजनकं यदि भवेत्, तर्हि फलमपि तस्मादेव संभवेत् । तदा अङ्गभूतानि कर्माणि निरर्थकानि स्यु: । अत: सर्वाङ्गयुक्तं प्रधानकर्मैव फलापूर्वजनकं भवति, तत्फलापूर्वद्वारैव क्षणिकान्यपि कर्माणि फलसाधनानि भवन्तीति सिद्ध्यति ।

## १.८. उत्पत्त्यपूर्वकल्पना

अत्र पुन: शङ्कां कुरुते ग्रन्थकार: – सर्वाङ्गविशिष्टस्य प्रधानकर्मण: सकाशादपूर्वोत्पत्तिर्भवतीति यदुक्तं, तन्न सम्भवति इत्याह। फलापूर्वजनकत्वं शीघ्रतरविनाशिन: प्रधानस्य अङ्गानाञ्च साहित्यमेव न सम्भवति । अङ्गकर्मण: प्रधानकर्मणश्च साहित्यं रूपघटयो: समवायसम्बन्धेनैव न भवति । अङ्गकर्म प्रधानकर्मणि न तिष्ठति । यतो हि क्रियाद्वयं परस्परसमवायेन न तिष्ठति । अत: अङ्गकर्म, प्रधानकर्म चोत्पत्तिसमनन्तरमेव विनश्यति । एवञ्च प्रधानाङ्गकर्मणो: साहित्यमसंभवमेवेति शंकामुत्थापयति ग्रन्थकार:।

**समाधानम् –** पूर्वपक्षिण: मन्तव्यं निराकृत्य सिद्धान्ती समाधत्ते । प्रधानकर्मणा अङ्गकर्मसाहित्यं यद्यपि स्वरूपतो न लभ्यते, तथापि प्रधानकर्म उत्पत्त्यपूर्वद्वारा अङ्गकर्मसाहित्यं लभते । यतो हि अङ्गकर्म- साहित्यलाभार्थं प्रधानकर्म-फलापूर्वयोर्मध्ये केवलं प्रधानकर्मण: सकाशादुत्पन्नमुत्पत्तिसंज्ञकमपूर्वं भवतीति मीमांसका: प्रतिपादयन्ति । तद्वदङ्गकर्माण्यपि परस्परं सन्निहितानि भूत्वैव प्रधानकर्मण: उपकारकाणि भवन्ति । किन्तु तान्यपि सर्वाणि अङ्गकर्माणि एकस्मिन्नेव काले न प्रत्यक्षाणि भवन्ति । अतस्तत्तदङ्गकर्मभ्य एकमेकमुत्पत्त्यपूर्वं प्रकल्प्य तदपूर्वद्वारा सर्वेषामङ्गकर्मणां परस्परं प्रधानकर्मणा सह सान्निध्यं भवति । अङ्गकर्मणां प्रधानोपकारकत्वं नाम प्रधानकर्मणि फलापूर्वनिर्माणसामर्थ्यं विज्ञाप्य तदुन्मुखीकरणमेव । साङ्गप्रधानकर्मण: सकाशादुत्पद्यमानं यदपूर्वं, तत् फलापूर्वम् । अङ्गरहितात् प्रधानकर्मण: सकाशात् तदनुष्ठानसमाप्तिसमनन्तरक्षणे एवोत्पद्यमानमपूर्वमुत्पत्त्यपूर्वमिति । अनेकेषा-मङ्गानां साहित्यलाभार्थं तत्तदङ्गानुष्ठानसमनन्तरक्षणे तत्तदङ्गानुष्ठानजनितमपूर्वमङ्गोत्पत्त्य-पूर्वमित्युच्यते । प्रधानकर्मणा सह सर्वाङ्गसान्निध्यार्थं प्रधानोत्पत्त्यपूर्वस्य कल्पना क्रियते । इदं फलापूर्वमेव परमापूर्वशब्देनोच्यते। एवं त्रीणि अपूर्वाणि कल्प्यन्ते । एतदेवाङ्ग-प्रधानयो: साहित्यमित्युच्यते ।

दर्शपूर्णमासयागे विशेषं प्रतिपादयति । तत्र 'यदाऽऽग्नेयोऽष्टाकपालोऽमावास्यायाञ्च पौर्णमास्याञ्चाच्युतो भवति' इति वाक्येनाग्नेययागो विधीयते । 'ताभ्यामेत-मग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत्' इति वाक्येनाग्नीषोमीययागो विधीयते । तथा 'उपांशुयाजमन्तरा यजति' इति वाक्येन उपांशुसंज्ञको यागो विधीयते । उपांशुयागस्य 'तावब्रूता' इति वाक्येन पौर्णमास्यां विधानं क्रियते । एवं च पौर्णमास्यां तिथौ त्रय: प्रधानयागा: भवन्ति । आग्नेयाग्नीषोमीयोपांशुयाजसंज्ञकानां त्रयाणां यागानां 'यदाग्नेय ...' इत्यादि तत्तद्वाक्यैरवगतो य: पौर्णमासकालेन सम्बन्ध: तमनुलक्ष्य 'य एवं विद्वान् पौर्णमासीं यजते' इति विद्वद्वाक्ये एकवचनान्तेन पौर्णमासीपदेन यागत्रयात्मकस्य समुदायस्यानुवाद: क्रियते । तेन वेदे यागप्रकरणे यत्र क्वचन प्रयुक्तेन पौर्णमासीपदेन आग्नेयादियागसमुदायस्यैव उपस्थिति: ज्ञातव्या । अष्टसु कपालेषु संस्कृत: पुरोडाश: अष्टाकपालशब्देनोच्यते । तथा एकादशकपालेषु संस्कृत: पुरोडाश: एकादशकपालशब्देनोच्यते ।

## १.९. यजिपदाश्रवणेऽपि यागविधानम्

अत्र पुन: आशङ्कते ग्रन्थकार: - 'यदाग्नेयोऽष्टाकपालोऽमावास्यायाञ्च पौर्णमास्याञ्चाच्युतो भवति' इत्यस्मिन् वाक्ये यागवाचकपदाश्रवणाद् वाक्यमिदं यागस्य विधानं कथं कुर्यात् ? आशङ्का-निराकरणपूर्वकं समाधत्ते - 'अग्निरस्ति देवता यस्य पुरोडाशस्ये'त्यर्थे विहितोऽयमाग्नेयशब्दोऽस्ति । तस्याग्नेयशब्दस्य 'अष्टाकपालपुरोडाश' शब्देन सह एकार्थावबोधकत्वरूपसामानाधिकरण्याद् द्रव्यदेवतयो: सम्बन्धावगमो 'यदाग्नेये'ति वाक्येन भवति । स च सम्बन्धो यागं विना न सम्भवति । द्रव्यदेवतयो: सम्बन्धो यागातिरिक्तायां कस्यामपि क्रियायां न संभवति । तेन च यागक्रियायामेव सम्बन्ध: स्वीकर्त्तव्य: । यतो हि देवतोद्देश्येन क्रियमाणस्य द्रव्यत्यागस्य यागरूपत्वस्वीकारात् । अत: आग्नेयादिशब्दै: ज्ञातस्य द्रव्यदेवतासम्बन्धोपपत्त्यर्थं कल्पितेन यजेत इति पदेन यागो विधीयते । यथा - अग्निदेवतोद्देशेन पुरोडाशद्रव्येण अमावास्यादि काले कर्त्तव्येन यागेन इष्टं भावयेत् । एवमेव यत्र यत्र केवलं द्रव्यदेवतासम्बन्ध: श्रुतो भवति तत्र तत्र द्रव्यदेवतासम्बन्धेनानुमितस्य यागस्य विधि: ज्ञातव्य: । यथा 'सौर्यं चरुं निर्वपेत्' इत्यादौ सूर्यदेवताचरुद्रव्ययोरनुमानेन तत्सम्बन्धित: यागो विधीयत इति न कश्चन दोष आपतेत् । इति।

स्वानुशीलनप्रश्नाः

१) पौर्णमास्यां कति प्रधानयागा: अनुष्ठीयन्ते ?

उत्तरं- ........................................

२) कदाऽपूर्वं स्वीक्रियते ?

उत्तरं- ........................................

## १.१०. लिङ्प्रत्ययाद्यभावेऽपि विधिकल्पना

पूर्वपक्षी पुनः शङ्कामुत्थापयति – 'उपांशुयाजमन्तरा यजति' इत्यस्मिन् वाक्ये प्रत्यक्षं यजतेः विद्यमानत्वेऽपि विधिबोधकलिङादिप्रत्ययस्य प्रयोगाभावात् तेन वाक्येन उपांशुयागस्य विधानं कथं भवितुमर्हति ?

**समाधानम् –** सिद्धान्ती पूर्वपक्षनिराकरणपूर्वकं समाधानमुपस्थापयति । यजतीत्यस्य पदस्य 'यजेत' इति विभक्तिविपरिणामेन 'उपांशु...' इति वाक्यस्य यागविधायकत्वं सम्भविष्यति । एवमेव यत्र यत्र वाक्येषु लिङ्लकारः न श्रूयते 'व्रीहीन् प्रोक्षति', 'समिधो यजति' इत्यादावपि विपरिणामो बोधनीयः । केचन विद्वांसः यजतीत्यादिस्थलेषु 'यजति' इति रूपं लेट्लकारस्यामनन्ति । तेषां मतेन एतादृशानां वाक्यानां विधायकत्वे न कश्चन संशयः स्यात् ।

पौर्णमासीतिथिसम्बन्धि सर्वं वृत्तमुपपाद्याधुना दर्शकालसम्बन्धिवृत्तं प्रतिपादयति । यथा पौर्णमास्यां तिथौ त्रयः प्रधानयागाः प्रतिपादिताः, तथैव 'ऐन्द्रं दधि, ऐन्द्रं पयः' इति वाक्याभ्यां विहितौ द्वौ सान्नाय्ययागौ, अथ 'यदाऽऽग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति' इति वाक्येन विहित आग्नेययाग इति त्रयो यागा अमावास्यायां तिथौ प्रधानाः सन्ति । एतेषां त्रयाणां यागानां समुदायस्य 'य एवं विद्वानमावास्यां यजते' इति वाक्ये अमावास्यामिति द्वितीयैकवचनान्तेन अनुवादः कृतोऽस्ति । 'यदाग्नेय...' इति वाक्ये कालद्वयस्य उल्लेखो वर्त्तते । किन्त्वेकमेव कर्म वर्त्तते । एकस्यैव कर्मणः आवृत्तिं विना कालद्वयेऽनुष्ठानं कर्त्तुं न शक्यते । अतः पौर्णमास्यामनुष्ठितस्याग्नेययागस्य पुनश्चामावास्यायामनुष्ठानं कर्त्तव्यम् । वेदे यत्र क्वचन दर्शशब्दोऽमावास्याशब्दो वा श्रूयेत, तत्र त्रयाणां यागानां समुदाय एवोपस्थितो भवति । 'य एवं विद्वान् पौर्णमासीं यजते', 'य एवं विद्वानमावास्यां यजते' इति विद्वत्पदघटितवाक्ये पौर्णमासी- अमावास्यापदाभ्यां प्रत्येकमेकैकस्य त्रिकस्य त्रयाणां यागानां समुदायरूपेण योऽनुवादः कृतोऽस्ति तस्य प्रयोजनं 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति । अस्मिन् वाक्ये दर्शपूर्णमासाभ्यामिति द्विवचनोपपत्त्यर्थ-मयमनुवाद इति विज्ञेयम् । अन्यथा तत्रानुष्ठीयमानानामाग्नेयादिषण्णां यागानामनेकत्वात् 'दर्शपूर्णमासैः' इति बहुवचनेन भाव्यम् । केनापि अन्येन प्रमाणेन ज्ञातस्यार्थस्य पुनः श्रवणमनुवादः । यथा तत्तद्वाक्यैर्विहिता आग्नेयादिषड्यागाः प्राधान्यं भजन्ते , तथा फलवतां प्रधानयागानां सन्निधौ तत्तद्वाक्यैर्विहितानि प्रयाजानुयाजा-ज्यभागादीनि फलरहितानि यानि कर्माणि, तानि तेषां प्रधानयागानामङ्गभूतानि भवन्ति।

## १.११. त्रिकापूर्वाद्युत्पत्तिः

दर्शपदेन पूर्णमासपदेन च यागानां त्रिकं त्रिकं ग्राह्यमिति निश्चिते सति 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्यस्यायमर्थो निष्पद्यते – परस्परसंयुक्ताभ्यां दर्शसमुदायपूर्णमाससमुदायाभ्यामिति द्वाभ्यां समुदायाभ्यां स्वर्गजनकमपूर्वं सम्पादनीयम्

। अत्र शङ्का भवति – भिन्नभिन्नकालस्थितयोः यागसमुदाययोः परस्परं सान्निध्यं कथं भवितुमर्हति ?

**समाधानम्** – यागसमुदाययोः स्वरूपतः सान्निध्याभावेऽपि एकैकस्माद् यागत्रिकादेकैकमपूर्वमुत्पद्यते । तदपूर्वद्वारा द्वयोरपि यागसमुदाययोः साहित्यमुपपद्यते । त्रयाणां यागानां समूहः एकं त्रिकमित्युच्यते ।

पुनः शङ्का भवति यत् – एकैकस्मात् त्रिकात् त्रिकापूर्वं कथमुत्पद्यत इत्याकाङ्क्षायां समाधानं क्रियते यत् प्रधानयागानुष्ठानात् पूर्वमनुष्ठितैः प्रयाजानुयाजाद्यङ्गैः, अथ च प्रधानयागानुष्ठानोत्तरमनुष्ठीयमानैरङ्गैः सहितादेकैकस्माद् यागत्रिकात् समुदायापूर्वमुत्पद्यते । एकैकस्मिन् यागत्रिके सर्वेषामङ्गानां सान्निध्यं न सम्भवति, तत्सम्भवार्थं त्रिभ्यो यागेभ्यस्त्रीणि उत्पत्त्यपूर्वाणि जायन्ते । तद्द्वारा चैकैकं यागत्रिकं, सर्वाङ्गसान्निध्यं लभते। प्रयाजाद्यङ्गानामपि स्वरूपतः प्रधानयागसान्निध्यासंभवेऽपि तत्तदुत्पत्त्यपूर्वद्वारैव सान्निध्यं ज्ञातव्यम् । एवञ्च प्रधानयागोत्पन्नस्य उत्पत्त्यपूर्वस्य, प्रयाजाद्यङ्गोत्पन्नैरुत्पत्त्यपूर्वैः सह यत् सान्निध्यं तदेव प्रधानयागानामङ्गविशिष्टरूपं साङ्गत्वं विज्ञेयम् ।

पौर्णमास्यामनुष्ठीयमानेभ्यः त्रिभ्यः आग्नेयादिप्रधानयागेभ्य उत्पन्नानामपूर्वाणामथ च प्रयाजादिभ्योऽङ्गेभ्य उत्पन्नानामुत्पत्त्यपूर्वाणाञ्च साहित्येन एकं समुदायजन्यम-पूर्वमुत्पद्यते। तथैव दर्शयागेऽपि त्रिभ्यः १) आग्नेय- २) ऐन्द्रदधि- ३) ऐन्द्रपयोयागेभ्य उत्पन्नानां त्रयाणामपूर्वाणामथ च तदङ्गेभ्य उत्पन्नानामपूर्वाणां साहित्येन एकं समुदायजन्यमपूर्वमुत्पद्यते । आग्नेयादिप्रत्येकस्य पृथक् पृथगुत्पन्नेन एकैकेन उत्पत्त्यपूर्वेण त्रयाणां त्रयाणामपूर्वाणामेकैकं समुदायो भवति । ताभ्यामुभाभ्यां समुदायापूर्वाभ्यामेकं फलापूर्वसंज्ञकं महापूर्वं परमापूर्वं वा निष्पद्यते । तस्माच्च फलमुत्पद्यते । इदं फलापूर्वं यागकर्त्तुरात्मनि तावत्तिष्ठति, यावत् फलं न सम्पद्यते । अनेनैव महापूर्वेण यागकर्त्तुः फललाभो भवति । एवञ्च समस्ताङ्गसमन्विताभ्यां दर्शपौर्णमासाभ्यामपूर्वद्वारा स्वर्गः सम्पादनीयः । अतः फलापूर्वनिष्पत्त्यर्थं सर्वाङ्गसहितस्य प्रधानकर्मणः कर्त्तव्यताबोधको यो विधिः स प्रयोगविधिरिति सिद्ध्यति ।

## १.१२. विधिभेदाः

स च विधिस्त्रिविधः । यथा –१) अपूर्वविधिः, २) नियमविधिः, ३) परिसंख्याविधिश्च ।

१) **अपूर्वविधिः –** यो विधिरत्यन्तमप्राप्तमर्थं प्रापयति, सोऽपूर्वविधिरित्युच्यते । उदाहरणं यथा – दर्शपूर्णमासप्रकरणे 'व्रीहीन् प्रोक्षति' इति । यदीदं वाक्यं विधिर्न स्यात् तर्हि दर्शपूर्णमासयागे व्रीहीणां प्रोक्षणं केनचिदपि वाक्येन प्राप्तं नासीत्, किन्तु 'व्रीहीन् प्रोक्षती'ति विधिवाक्ये सति दर्शपूर्णमासयागीयव्रीहीणां प्रोक्षणं प्राप्तं भवति । अतोऽत्यन्तमप्राप्तस्य प्रोक्षणस्य विधायकत्वादयं विधिः अपूर्वविधिरित्युच्यते ।

२) **नियमविधिः** – विकल्पेन प्राप्तस्यार्थस्य नियमनं येन विधिवाक्येन क्रियते तद्विधिवाक्यं नियमविधि-रित्युच्यते । उदाहरणं यथा – दर्शपूर्णमासप्रकरणे 'व्रीहीन् अवहन्ति' इति अवहननवाक्यम् । इदमवहननविधिवाक्यं न भवति चेत् दर्शपूर्णमासयागोपयुक्तेषु व्रीहिषु 'यदाग्नेय...'इत्युत्पत्तिवाक्यावगतपुरोडाशोपयोगितण्डु-लनिष्पत्त्यर्थमपेक्षितवैतुष्यकरणार्थमवहननक्रिया भवति, तथैव वैतुष्यकरणार्थं नखवि-दलनक्रियाऽपि भवितुमर्हति । उभे अपि क्रिये एककालावच्छेदेन युगपन्नैव सिद्ध्यतः । नखविदलनपक्षे अवहननक्रिया अप्राप्ता भवेत् , तथैवावहननपक्षे नखविदलनमप्राप्तं भवेत् । अतः क्रियाद्वयमपि वैक-ल्पिकम् । नखविदलनपक्षे अवहननस्याप्राप्तत्वादवहननं विनाऽपि वैतुष्यस्य सत्त्वेन अवहननस्य पाक्षिकी प्राप्तिः स्यात् । अतोऽवहननेनैव वैतुष्यं कार्यमिति नियमविधिस्वीकारे नखविदलनं सर्वात्मना निवर्त्तेत इति नियमविधेः स्वरूपं सिद्ध्येत् ।अत्राशङ्कते – अत्र कदाचिदेवमाशङ्क्येत यत् तण्डुलनिष्पत्त्यनुकूला वितुषीकरणक्रिया नखविदलनेनापि यदा संभवति, तदा 'अवघातेनैव वितुषीकरणं कर्त्तव्यम्' इति नियमकरणं व्यर्थमेव । यतस्तस्य न किमपि प्रयोजनम् । तत्र समाधानं चेत्थं भवति – यतः अवहननक्रिययैव वितुषीकरणे सति एकमदृष्टं निष्पद्यत इति नियमजन्यमदृष्टं स्वीकृतमस्ति । अवहननस्य नियमकरणेन यद्यपि दृष्टं प्रयोजनं किमपि नास्ति, तथापि तादृशेन नियमेन एकमदृष्टमुत्पद्यते । तच्च नियमादृष्टं यागजन्यस्योत्पत्त्यपूर्वस्य सहायकं सत् फलापूर्वोपकारकं भवति । एवं च नियमापूर्वस्याभावे फलापूर्वमेव नोत्पद्येतेति कल्पनया नियमापूर्वस्य व्यर्थतापत्तिः न स्यात्।अतः नियमकरणं सप्रयोजनमस्ति । एवमेव सोमलताक्रयणनियमविषयेऽपि अवगन्तव्यम् ।

स्वानुशीलनप्रश्नाः
१) व्रीहीनवहन्ति इत्यत्र कः विधिः स्वीक्रियते ?
उत्तरं- ...............................................
२) कः प्रयाजः ?
उत्तरं- ................................................

३) **परिसंख्याविधिः** – द्वयोः स्थानयोरेककार्यसम्पादनार्थमेकस्य पदार्थस्य युगपत्प्राप्तिसम्भवे एकस्मात् स्थानात् तस्य पदार्थस्य निवर्त्तको विधिः परिसंख्याविधिः । एकस्मिन् अङ्गे प्रधानद्वयसम्बन्धे नियतप्राप्ते, एकस्मिंश्च प्रधाने अङ्गद्वयसम्बन्धे नियतप्राप्ते सति अन्यतरनिवृत्तिफलको विधिः परिसंख्याविधिरिति विज्ञेयम्। अथवा एकस्मिन् शेषिणि द्वयोरङ्गयोः युगपत्प्राप्तौ सत्यामितरस्य विधेयादङ्गाद् भिन्नस्याङ्गस्य निवर्त्तनरूपं फलं यस्य सः परिसंख्याविधिः । उदाहरणं यथा – पशुचयनप्रकरणे 'इमामगृभ्णन् रशनामृतस्य' इति मन्त्रः

अश्वरशनाग्रहणस्याङ्गत्वेन विहितोऽस्ति । 'इत्यश्वाभिधानीमादत्ते' इत्ययं विधिर्न स्याच्चेत् 'इमामगृभ्णन् रशनामृतस्य' इति मन्त्रगतेन रशनाग्रहणरूपार्थप्र-काशनात्मकेन लिङ्गप्रमाणेन अश्वरशनाग्रहणवत् गर्दभरशनाग्रहणेऽपि उपर्युक्तस्य मन्त्रस्य विनियोगो भवेत् । किन्तु 'इत्यश्वाभिधानीमादत्ते' इति विधिस्वीकारे 'इमामगृभ्णन्' इति मन्त्रेणाश्वरशनाया एव ग्रहणे प्रवर्त्तेत । गर्दभरशनायाः ग्रहणे च न प्रवर्त्तेत । गर्दभरशनायाः ग्रहणममन्त्रकमेव कर्त्तव्यम् । अनेन लिङ्गप्रमाणेन गर्दभरशनाग्रहणे प्राप्तस्यास्य मन्त्रस्य निवृत्तिर्भवति । अतः शेषरूपो मन्त्रात्मकः एकः पदार्थः। अश्वरशनाग्रहणे, गर्दभरशनाग्रहणे चेति द्वयोः शेषिणोः स्थाने लिङ्गप्रमाणेन युगपत्प्राप्तिरासीत्। तदा विधिवचनानुरोधेन एकस्माच्छेषिणः सकाशात् तस्य मन्त्रात्म-कस्य अङ्गस्य निवृत्तिरनेन विधिना प्रतिपादितत्वादयं परिसंख्याविधिः सिद्ध्यति ।

एवमन्यत्रापि परिसंख्याविधिः भवति । उदाहरणं यथा - 'पञ्च पञ्चनखा भक्ष्या' इत्यादौ । तच्च यथा -**'पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव ।** शशकः शल्लकी गोधा खड्गी कूर्मोऽथ पञ्चमः।।'(वा.रा.कि.का.१७/३९) अत्र परिसंख्या-विधिरेवाभ्युपगतोऽस्ति । अत्र 'पञ्च पञ्चनखाः भक्ष्याः' इत्युदाहरणे श्लोके परिगणिताः ये पञ्चनखप्राणिनः, तदितरेऽपि पञ्चनखप्राणिनः सन्ति । द्वयोरपि अङ्गभूतानां परिगणितानां तदितरेषामपि पञ्चनखिनां रागतः भक्षणीयत्वं प्राप्तं, तदा परिगणितेतरपञ्चनखिनां भक्षणात् निवर्त्तनार्थमयं विधिः प्रवृत्तोऽस्ति। अतोऽयं परिसंख्याविधिः। नियमविधौ विधेस्तात्पर्यम् । परिसंख्यायां तु निषेधे तात्पर्यम् । नियमविधिर्भावविषयकः, परिसंख्याविधिस्तु अभावविषयक इति उभयोर्भेदः । इति ।

स्वानुशीलनप्रश्नाः
१) परिसंख्याविधौ कस्य पशोः रशनाग्रहणार्थं निषिध्यते ?
उत्तरं- ..............................................
२) नियमविधि - परिसंख्याविध्योः कः भेदः ?
उत्तरं- ...............................................

## साराशः

महर्षिजैमिनिः द्वादशाध्यायविशिष्टं मीमांसाशास्त्रं प्रणीतवान् । तत्राद्यं सूत्रं भवति 'अथातो धर्मजिज्ञासा' इति। जैमिनिमनुसृत्य मीमांसापरिभाषाकारः श्रीकृष्णयज्वा ग्रन्थस्यादौ धर्मलक्षणं प्रतिपादित-वान् । तत्कृतं धर्मलक्षणं भवति 'वेदबोधितेष्टसाधनताको धर्मः'। अधर्मलक्षणं च 'वेदबोधितानिष्टसाधनताकोऽधर्मः । तत्र धर्मनिमित्तं वेद - स्मृति - सदाचाराख्यानि त्रीणि प्रमाणानि प्रतिपादितानि सन्ति । वेदः मन्त्ररूप - ब्राह्मणरूपभेदेन द्विविधः । मन्त्ररूपस्य प्रयोगकाले स्मरणं भवति । ब्राह्मणरूपस्य विधिवाक्यत्वेनान्वयो भवति । ब्राह्मणवाक्यं च षड्विधं प्रतिपादितम् ।

तत्र सर्वेषां वाक्यानां सोदाहरणं प्रतिपादनमत्र कृतमस्ति । मीमांसाशास्त्रे प्रतिपादितेषु चर्तुषु विधिषु प्रयोगविधिरन्यतमः। स च विधिः संपूर्णाङ्गविशिष्टस्य प्रधानकर्मणो विधायको भवति । सर्वाङ्गयुक्तं प्रधानकर्मैव फलापूर्वजनकं भवति। तत्फलापूर्वद्वारैव क्षणिकान्यपि कर्माणि फलसाधनानि भवन्ति । प्रधानकर्मणः सकाशात् तदनुष्ठानसमनन्तरक्षणे एवोत्पद्यमानमपूर्वमुत्पत्त्यपूर्वमिति उच्यते । यत्र केवलं द्रव्यदेवतासम्बन्धः श्रूयते तत्र यजिपदाश्रवणेऽपि द्रव्यदेवतासम्बन्धेन यागविधिरनुमीयते । तथैव लिङ्लकारस्याश्रवणेऽपि यागविधावुक्तत्वात् तेषां वाक्यानां विधिप्रतिपादकत्वं वर्त्तते । दर्शपौर्णमासयागे प्रधानद्वयं भवति । दर्शः एकः पौर्णमासश्चापरः । दर्शयागे आग्नेय - ऐन्द्रद्रधि - ऐन्द्रपयनाम्ना त्रीणि प्रधानानि । तथैव पौर्णमासयागे आग्नेय - उपांशु - अग्नीषोमीयनाम्ना त्रीणि प्रधानानि । एतेभ्यः त्रिभ्यः प्रधानकर्मभ्य एकमेकमपूर्वं जायते । तच्चापूर्वं महापूर्व-परमापूर्वरूपेण परिणमितं सत् फलं प्रापयति । विधिः अपूर्व - नियम - परिसंख्याभेदेन त्रिविधः । अपूर्वविधिरत्यन्तमप्राप्तमर्थं प्रापयति । नियमविधिः पक्षे प्राप्तमर्थं नियमयति । परिसंख्याविधिश्च युगपत् प्राप्तयोः द्वयोः पक्षयोरेकपक्षं निषिध्यापरं पक्षं प्रापयति इति ।

## पारिभाषिकशब्दाः

१) प्रयाजः - प्रकर्षेण इज्यन्ते देवता एभिस्ते प्रयाजाः ।

२) उत्पत्तिविधिः - कर्मस्वरूपमात्रप्रकाशकः विधिः ।

३) अनुयाजाः - अनु पश्चात् प्रधानयागानन्तरमिज्यते यैरिति व्युत्पत्त्या होत्रा पठ्यमाना याज्यामन्त्रा अनुयाजाः।

४) आज्यभागौ - आज्यं भागो ययोस्तौ आज्यभागौ अग्नीषोमौ ।

५) प्रोक्षणम् - कतिपयावयवेषु जलसंयोगानुकूलव्यापारः प्रोक्षणम् ।

## आदर्शप्रश्नाः

### क. निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः)

१) ब्राह्मणवाक्यभेदान् सोदाहरणं प्रतिपादयत ।

२) प्रयोगविधिं विचारयत ।

३) विधिभेदान् सोदाहरणं समन्वयं कुरुत ।

### ख. विश्लेषणात्मकप्रश्नाः (प्रत्येकं १५/१० अङ्काः)

१) धर्माधर्मयोः निरूपणं कुरुत ।

२) उत्पत्त्यपूर्वकल्पना कथं क्रियेत ?

३) यजिपदाश्रवणेऽपि यागविधानं कथं भवति ?

४) लिङ्प्रत्ययाद्यभावेऽपि विधिः कथं कल्प्येत ?

५) नियमविधिं सोदाहरणं विवेचयत ।

### ग. लघुप्रश्नाः (प्रत्येकं ५ अङ्काः)

१) वेदस्य द्वैविध्यं प्रतिपादयत ।

२) मीमांसापरिभाषाकर्त्तुः परिचयं प्रदीयताम् ।

३) अपूर्वविधिं सोदाहरणं विचारयत ।

४) 'पञ्च पञ्चनखाः भक्ष्याः' इत्यत्र परिसंख्या कथं स्वीक्रियते ?

५) धर्मप्रमाणानि विवेचयत ।

६) गुणवाक्यं सोदाहरणं विशदयत ।

७) फलापूर्वकल्पना कथं क्रियते ?

८) दर्शे के प्रधानयागाः ?

**घ. एकाङ्कप्रश्नाः (प्रत्येकमेकाङ्कः)**

१) पौर्णमास्यां कति प्रधानयागाः ?

२) धर्मस्य किं स्वरूपम् ?

३) कलञ्जभक्षणेन किं भवति ?

४) येन वाक्येन कर्म ज्ञायते, तद्वाक्यं किं नामधेयम् ?

५) ब्राह्मणवाक्यं कतिविधम् ?

६) फलवाक्यं कस्मिन् विधौ अन्तर्भवति ?

७) याग-स्वर्गयोर्मध्ये कः सम्बन्धं स्थापयति ?

८) 'उपांशुयाजमन्तरा यजति' इत्यनेन वाक्येन कः यागः विधीयते ?

९) 'व्रीहीन् प्रोक्षति' इत्यस्मिन् वाक्ये कः विधिः स्वीक्रियते ?

१०) फलवाक्येन किं ज्ञायते ?

**एकाङ्कस्योत्तराणि** -१) त्रीणि, २) वेदबोधितेष्टसाधनताको धर्मः, ३) अधर्मः, ४) कर्मोत्पत्तिवाक्यम्, ५) षड्विधम्, ६) अधिकारविधौ, ७) अपूर्वम्, ८) उपांशुयागः, ९) अपूर्वविधिः, १०) स्वर्गादिकं फलम् ।

*******

# द्वितीयखण्डः- श्रुत्यादि षट् प्रमाणानि इत्यस्मात् विषयात् काम्यकर्मणस्त्रैविध्यपर्यन्तम्

संरचना

२.१. प्रस्तावना
२.२. उद्देश्यम्
२.३. श्रुत्यादिषट्प्रमाणानि
२.४.श्रुतिप्राबल्यविचार:
२.५. लिङ्गादिप्राबल्यविचार
२.६. कर्मभेदविचार:
२.७. प्रतिपत्तिभेदा:
२.८. यागहोमशब्दार्थविचार:
२.९.प्रधानपूर्वकाला प्रतिपत्ति:
२.१०.उपयोक्ष्यमाणसंस्कारभेदा:
२.११. मतान्तरेण प्रतिपत्तिलक्षणम्
२.१२. अर्थगुणकर्मणो: प्राधान्यविचार:
२.१३. गुणकर्मभेदा:
२.१४. अर्थकर्मभेदा:
२.१५. काम्यकर्मभेदा:

## २.१. प्रस्तावना

मीमांसापरिभाषाया: द्वितीयप्रकरणे श्रुत्यादि षट् प्रमाणानि विचारितानि सन्ति । तेषां विषये आलोचनमत्र प्रस्तूयते । श्रुति- लिङ्ग- वाक्य- प्रकरण- स्थान- समाख्यासु परस्परं प्राबल्यदौर्बल्यविचारश्च तदनु विधीयते । अङ्गत्वबोधकप्रमाणानां विषये प्रतिपादनानन्तरमङ्गलक्षणं, तेषामङ्गकर्मणां भेदाश्चालोचिता: स्यु: । अर्थकर्म - गुणकर्मभेदेन कर्म द्विविधं प्रतिपादितम् । तेषां कर्मणां स्वरूपविवेचनं चात्र विधीयते । प्रतिपत्तिकर्मण: स्वरूपं तद्भेदाश्चात्र विविच्यन्ते । उपयोक्ष्यमाणसंस्काराणां भेदकल्पनमत्र तदनु मीमांसापरिभाषारीत्या प्रतिपादितम् । अर्थगुणकर्मणो: प्राधान्यं तत एव आलोच्येत । तत: गुणकर्म- अर्थकर्मणो: भेदाश्चात्रोपस्थापिता: स्युरिति ।

## २.२. उद्देश्यम्

अस्मिन् पाठ्यांशे मुख्यत: निम्नोक्ता: ध्यानबिन्दवो भवन्ति । यथा-

- अङ्गत्वबोधकप्रमाणानां विषये भवन्त: जानीयु: ।
- श्रुति- लिङ्गादीनां प्राबल्यदौर्बल्यविचारविषये भवतां ज्ञानं भवेत् ।
- कर्मभेदविषये भवद्भि: ज्ञायेत ।
- प्रतिपत्तिकर्मण: स्वरूप-भेदयो: ज्ञानं भवतां भवेत् ।
- अर्थकर्म- गुणकर्मणो: प्राधान्यविषये भवन्त: ज्ञातुं शक्नुयु: ।

## २.३. श्रुत्यादिषट्प्रमाणानि

दर्शपूर्णमासयागस्य प्रयाजानुयाजादीनि अङ्गकर्माणि भवन्तीति प्राक् प्रपञ्चितम् । अङ्गत्वबोधकप्रमाणानि षट् संख्यकानि भवन्ति । तानि यथा -१) श्रुतिः, २) लिङ्गम्, ३) वाक्यम्, ४) प्रकरणम्, ५) स्थानम्, ६) समाख्या चेति । इदानीमङ्गत्वबोधकप्रमाणानां स्वरूपमुदाहरणञ्च प्रतिपाद्येते ।

**१) श्रुतिप्रमाणनिरूपणम् –** उपर्युक्तेषु षडङ्गबोधकप्रमाणेषु सर्वश्रेष्ठं प्रमाणं भवति श्रुति: । 'निरपेक्षरव: श्रुति:' इति श्रुते: लक्षणम् ।उदाहरणं यथा – 'दध्ना जुहुयात्' इति । अत्र अग्निहोत्रहोमविधायकेन वाक्येन प्राप्तं होमं 'जुहुयात्' इत्यनेन पदेन उद्दिश्य तत्करणत्वेन 'दध्ना' इति तृतीयाश्रुत्या 'दधि' विधीयते । अत: तृतीयाश्रुतिप्रमाणेन दध्न: होमाङ्गत्वं निश्चीयते ।

**२) लिङ्गप्रमाणनिरूपणम् –** लिङ्गं नाम सामर्थ्यम् । तच्च सामर्थ्यं द्विप्रकारकम् । तत्र एकमर्थगतं, द्वितीयं शब्दगतम् । अर्थगतस्योदाहरणं यथा – 'स्रुवेण अवद्यति' इति वाक्ये 'अवद्यति' पदं दृष्ट्वा स्रुवस्यावदानमात्राङ्गत्वं यद्यपि ज्ञायते, तथापि अर्थगतसामर्थ्यरूपेण लिङ्गप्रमाणेन आज्यसान्नाय्या-दिद्रवद्रव्याणामवदाने एव स्रुव: अङ्गं भवति । यत: स्रुवाख्येन यज्ञीयपात्रेण पुरोडाशादिकठिनद्रव्यस्यावदानं नैव शक्यम् ।

अधुना द्वितीयं शब्दगतं लिङ्गप्रमाणं लक्षयति । शब्दगतं तु लिङ्गमर्थप्र-काशनसामर्थ्यम् । शब्द: स्वनिष्ठसामर्थ्येनार्थं बोधयति । अत: शब्दगतं लिङ्गं नाम अर्थप्रकाशनशक्ति: । शब्दगतलिङ्गस्योदाहरणं यथा – 'अग्नये त्वा जुष्टं निर्वपामि' इति मन्त्रे 'निर्वपामि' शब्द: निर्वपणक्रियां प्रकाशयितुं समर्थोऽस्ति। अत: अर्थप्रकाश-नसामर्थ्यरूपेण लिङ्गप्रमाणेन 'अग्नेय त्वा जुष्टं निर्वपामि' इति मन्त्र: निर्वापक्रियायामङ्गं भवति । यो मन्त्र: यां क्रियां प्रकाशयति, स मन्त्र: तस्यां क्रियायामङ्गं भवति ।

**३) वाक्यनिरूपणम् –** पदान्तरसमभिव्याहारो वाक्यम् । अर्थात् अर्थप्रकाशनयोग्यानां पदानामव्यवधानेनोच्चारणमिति वाक्यप्रमाणस्य लक्षणम् । उदाहरणं यथा – 'इष्टे त्वा इति छिनत्ति' इति । अत्र क्रियाया अङ्गत्वेन 'इष्टे त्वा' इति मन्त्रस्य विधानं वाक्यप्रमाणेन क्रियते । अपरमुदाहरणं दीयते यत् 'अग्नये त्वा जुष्टं निर्वपामि' इति । अर्थैकत्वादेकं वाक्यं साकांक्षां चेद् विभागे स्यात्' इति

एकवाक्यत्वलक्षणानुसारेणास्मिन् उदाहरणे 'अग्नये, त्वा, जुष्टम्' इत्येषां पदानां 'निर्वपामि' इत्यनेन पदेन सह एकवाक्यतया अयं मन्त्रः निर्वापक्रियायामङ्गं भवति ।

४) **प्रकरणनिरूपणम्** – प्रकरणं नाम परस्पराकांक्षा । अस्यार्थः परस्परमङ्गाङ्गिनोरुभयोराकांक्षा प्रकरणम्' इति प्रकरणप्रमाणस्य लक्षणम् । उदाहरणं यथा – 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति । अत्र 'दर्शपूर्णमासाभ्यां स्वर्गापूर्वमुत्पादयेत्' इत्युक्ते दर्शपूर्णमासाभ्यां स्वर्गापूर्वं कथमुत्पादयेदिति आकांक्षा जायते। तथा स्वर्गादिफलसाधनत्वेनावगतानामाग्नेयादिवाक्यानां समीपे एव 'समिधो यजति', 'तनूनपातं यजति', 'आज्यभागौ यजति' इत्यादिभिर्वाक्यैः फलरहितानि प्रयाजादीनि कर्माणि श्रुतानि भवन्ति । प्रयाजादीनां तद्विधायकवाक्येषु फलं न श्रुतमस्ति । तस्मात् प्रयाजादीनामनुष्ठानेन किं फलमिति आकांक्षा उत्पद्यते । एवञ्च प्रयाजादीनां यागानां प्रयोजनाकांक्षा यथा भवति, तथा दर्शपूर्णमासयोः इतिकर्त्तव्यताकांक्षा उत्पद्यते । तेन उभयाकांक्षारूपेण प्रकरणप्रमाणेन फलरहितानां सर्वेषां प्रयाजादीनां दर्शपूर्णमासाङ्गता निश्चीयते। अतः प्रयाजादयः दर्शपूर्णमासकर्मणि अङ्गमिति प्रकरणप्रमाणेन ज्ञायते ।

५) **स्थानप्रमाणनिरूपणम्** – स्थानं नाम सन्निधिः । उदाहरणं – सान्नाय्यपात्रसन्निधौ 'शुन्धध्वं दैव्याय कर्मणे देवयज्यायै' इति अयं मन्त्रः पठितोऽस्ति । तेन स्थानप्रमाणेन सन्निधिपाठवशादयं मन्त्रः सान्नाय्यपात्रप्रोक्षणे अङ्गं भवति ।

६) **समाख्याप्रमाणनिरूपणम्** – समाख्या नाम यौगिकपदस्य अवयवार्थवशाज्जायमाना संज्ञा । उदाहरणं यथा – अध्वर्युकाण्डे प्रतिपादितस्य अग्न्यन्वाधानादिकर्मसमुदायस्य 'आध्वर्यवम्' इति समाख्या भवति । अतः तत्कर्मणि तत्कर्त्तृत्वरूपेणाध्वर्युः अङ्गं भवति । तथैव 'ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः' इत्यादिवाक्यैर्विहितानाम् 'उभावामिन्द्राग्नी' इत्यादीनां मन्त्राणां काम्येष्टियाज्यानुवा-क्याकाण्डे समाख्यावशात् याज्यानुवाक्यारूपेण 'ऐन्द्राग्न्यादिकाम्येष्टियागेषु' विनियोगः कृतोऽस्ति । विनियोगो नाम अङ्गरूपेणान्वयः।

स्वानुशीलनप्रश्नाः

१) अङ्गत्वबोधकप्रमाणानि कति संख्यकानि ?

उत्तरं – ........................................

२) वाक्यस्य किं स्वरूपम् ?

उत्तरं– ......................................

## २.४.श्रुतिप्राबल्यविचारः

श्रुत्यादीनां षट् प्रमाणानामेकस्मिन्नेव स्थले समावेशे पूर्वपूर्वप्रमाणस्य प्राबल्यम्, उत्तरोत्तरस्य प्रमाणस्य दौर्बल्यम् । तेन प्रबलेन प्रमाणेन दुर्बलस्य प्रमाणस्य बाधो भवति । तत्र श्रुतिप्राबल्यस्योदाहरणं यथा - चयनयागप्रकरणे 'कदाचनस्तरीरसि नेन्द्रसश्चसि दाशुषे' इति ऐन्द्र्या ऋचा गार्हपत्यमुपतिष्ठते' इति प्रतिपादितमस्ति । अत्र मन्त्रस्य इन्द्रदेवतात्मकस्यार्थस्य प्रकाशनसामर्थ्यरूपेण लिङ्गप्रमाणेन ऐन्द्र्या ऋचः इन्द्रोपस्थानाङ्गत्वं प्राप्तमस्ति । अर्थात् ऐन्द्रेण मन्त्रेण इन्द्रदेवताया उपस्थानं कर्त्तव्यमिति लिङ्गप्रमाणेन ज्ञायते। तथा 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यत्र 'ऐन्द्र्या' इति तृतीयाश्रुत्या 'गार्हपत्यम्' इति द्वितीयाश्रुत्या च तस्यैव ऐन्द्रमन्त्रस्य, गार्हपत्योपस्थानाङ्गत्वमपि प्राप्तमस्ति । अर्थादैन्द्रेण मन्त्रेण गार्हपत्यस्योपस्थानं कर्त्तव्यमिति श्रुतिप्रमाणेन ज्ञायते । तत्र किं कर्त्तव्यमिति सन्देहे सति श्रुतिलिङ्गयोः प्रमाणयोः प्राबल्यदौर्बल्यनिरीक्षणेन निर्णयः क्रियते । श्रुतिप्रमाणेन ऐन्द्रमन्त्रस्य, गार्हपत्योपस्थानाङ्गत्वेन विधानात्, लिङ्गप्रमाणप्राप्तस्य इन्द्रोपस्थाने मन्त्रविनियोगस्य तथा बाधो भवति ।

लिङ्गप्रमाणापेक्षया पूर्वप्रमाणं श्रुतिरस्ति । सा तदपेक्षया प्रबला । अतः श्रुतिः स्वयमेव अङ्गत्वेन विनियोगं करोति । लिङ्गप्रमाणं तु 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इति श्रुतिं कल्पयित्वा विनियोगं कर्त्तुं समर्था भवति । एतदर्थं लिङ्गं श्रुत्यपेक्षया दुर्बलं भवति, परापेक्षत्वात् । यत्र श्रुत्या प्रत्यक्षविनियोगो न भवति, तत्र 'अग्नये त्वा जुष्टं निर्वपामि' इत्यादिस्थले मन्त्रस्य निर्वापात्मकार्थप्रकाशनसामर्थ्यमालोच्य 'अनेन मन्त्रेण निर्वापं कुर्यात्' इति श्रुतिकल्पनाद्वारा लिङ्गप्रमाणं विनियोजकं भवत्येव । यतोऽत्र लिङ्गप्रमाणकल्पितायाः श्रुतेः किमपि बाधकं नास्ति ।

## २.५. लिङ्गादिप्राबल्यविचारः

इदानीं लिङ्गप्राबल्यस्योदाहरणमुपस्थाप्यते यथा - 'स्योनन्ते सदनं कृणोमि, तस्मिन् सीद'। सम्पूर्णमन्त्रो यथा -'स्योनं ते सदन कृणोमि,घृतस्य धारया सुषेवं कल्पयामि । तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः' इति ।

अस्मिन् मन्त्रे 'तस्मिन्' पदगतः 'तत्' शब्दः पूर्ववाक्यार्थमपेक्षते । तेनास्य वाक्यस्य पूर्ववाक्येन सह एकवाक्यत्वावगमात् वाक्यप्रमाणेन 'स्योनम्', 'तस्मिन्' इत्येतयोरेकमन्त्रत्वं प्रतीयते, किन्तु लिङ्गप्रमाणेन इमो द्वौ मन्त्रौ स्तः इति ज्ञायते । यतः 'स्योनम्' इति प्रथमं वाक्यं सदनरूपमर्थं प्रकाशयति, द्वितीयं 'तस्मिन्' इति वाक्यं सादनरूपमर्थं प्रकाशयति । अस्यां परिस्थितौ वाक्यप्रमाणात् लिङ्गप्रमाणस्य प्रबलत्वात् लिङ्गप्रमाणेन वाक्यप्रमाणं बाध्यते । अतः लिङ्गप्रमाणेन 'स्योनं ते' इत्ययं मन्त्रः सदनक्रियायामङ्गं भवति । 'तस्मिन् सीद' इत्ययं मन्त्रश्च सादनक्रियायामङ्गं भवति, 'स्योनं ते','तस्मिन् सीद' इत्युभयोर्मन्त्रयोरेकवाक्यतया कथञ्चित् सादनात्मकार्थप्रकाशन-सामर्थ्यरूपं लिङ्गं कल्पयित्वा पश्चात् 'अनेन विशिष्टेन सम्मिलितेन मन्त्रद्वयेन सादनं कुर्यात्' इत्याकारा श्रुतिः कल्पनीया भवति । किन्तु 'स्योनं ते' इति मन्त्रगतेन सदनार्थप्रकाशनरूपेण प्रत्यक्षलिङ्गेन कल्पितया 'स्योनं ते' इति मन्त्रेण सदनं कुर्यात् इति

श्रुत्या 'स्योनं ते' इत्यस्य मन्त्रस्य सदनकरणे शीघ्रं विनियोगो भवति । अत: वाक्यप्रमाणद्वारा लिङ्गप्रमाणं कल्पयित्वा यत् श्रुतिकल्पनं तत् निरुद्धं भवति। यत: प्रथमं वाक्येन लिङ्गकल्पनं, ततो लिङ्गेन श्रुतिकल्पने विलम्बो भवति । अत: प्रत्यक्षलिङ्गप्रमा-णेन श्रुतिकल्पनाया: शीघ्रतरत्वात् वाक्येन श्रुतिकल्पनमवरुद्धं भवति । तेन लिङ्गेन वाक्यप्रमाणं बाध्येत ।

अनयैव रीत्या वाक्यप्रमाणेन प्रकरणप्रमाणस्य, प्रकरणप्रमाणेन क्रमप्रमाणस्य, क्रमप्रमाणेन समाख्याप्रमाणस्य बाधो वेदितव्य: । तथैव श्रुतिप्रमाणेन लिङ्गप्रमाणबाध इव वाक्यादिप्रमाणानामपि बाधो भवति । प्रमाणस्य दौर्बल्यम् । तेन प्रबलेन प्रमाणेन दुर्बलस्य प्रमाणस्य बाधो भवति । तत्र श्रुतिप्राबल्यस्योदाहरणं यथा – चयनयागप्रकरणे 'कदाचनस्तरीरसि नेन्द्रसश्चसि दाशुषे' इति ऐन्द्र्या ऋचा गार्हपत्यमुपतिष्ठते' इति प्रतिपादितमस्ति । अत्र मन्त्रस्य इन्द्रदेवतात्मकस्यार्थस्य प्रकाशनसामर्थ्यरूपेण लिङ्गप्रमाणेन ऐन्द्र्या ऋच: इन्द्रोपस्थानाङ्गत्वं प्राप्तमस्ति । अर्थात् ऐन्द्रेण मन्त्रेण इन्द्रदेवताया उपस्थानं कर्त्तव्यमिति लिङ्गप्रमाणेन ज्ञायते। तथा 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यत्र 'ऐन्द्र्या' इति तृतीयाश्रुत्या 'गार्हपत्यम्' इति द्वितीयाश्रुत्या च तस्यैव ऐन्द्रमन्त्रस्य, गार्हपत्योपस्थानाङ्गत्वमपि प्राप्तमस्ति । अर्थादैन्द्रेण मन्त्रेण गार्हपत्यस्योपस्थानं कर्त्तव्यमिति श्रुतिप्रमाणेन ज्ञायते । तत्र किं कर्त्तव्यमिति सन्देहे सति श्रुतिलिङ्गयो: प्रमाणयो: प्राबल्यदौर्बल्यनिरीक्षणेन निर्णय: क्रियते । श्रुतिप्रमाणेन ऐन्द्रमन्त्रस्य, गार्हपत्योपस्थानाङ्गत्वेन विधानात्, लिङ्गप्रमाणप्राप्तस्य इन्द्रोपस्थाने मन्त्रविनियोगस्य तथा बाधो भवति ।

लिङ्गप्रमाणापेक्षया पूर्वप्रमाणं श्रुतिरस्ति । सा तदपेक्षया प्रबला । अत: श्रुति: स्वयमेव अङ्गत्वेन विनियोगं करोति । लिङ्गप्रमाणं तु 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इति श्रुतिं कल्पयित्वा विनियोगं कर्त्तुं समर्था भवति । एतदर्थं लिङ्गं श्रुत्यपेक्षया दुर्बलं भवति, परापेक्षत्वात् । यत्र श्रुत्या प्रत्यक्षविनियोगो न भवति, तत्र 'अग्नये त्वा जुष्टं निर्वपामि' इत्यादिस्थले मन्त्रस्य निर्वापात्मकार्थप्रकाशनसामर्थ्यमालोच्य 'अनेन मन्त्रेण निर्वापं कुर्यात्' इति श्रुतिकल्पनाद्द्वारा लिङ्गप्रमाणं विनियोजकं भवत्येव । यतोऽत्र लिङ्गप्रमाणकल्पिताया: श्रुते: किमपि बाधकं नास्ति ।

## २.६. कर्मभेदविचार:

कर्त्तव्यताबोधकब्राह्मणवाक्यानां भेदं प्रतिपाद्य इदानीं तत्प्रतिपाद्यानां कर्मणां भेदमुपस्थापयति। अत्र कर्मशब्देन ब्राह्मणवाक्यबोधकं कर्म उच्यते । सामान्यत: अङ्गप्रधानरूपस्य कर्मण: प्रकारद्वयमस्ति । यथा – १) अर्थकर्म, २) गुणकर्म चेति ।

**अर्थकर्मण: स्वरूपम्** – अधुना सन्निपत्योपकारकाङ्गं विशेषतया निरूपयितुं वैदिककर्मणो विभागं दर्शयति । आत्मगतापूर्वजनकं कर्म अर्थकर्म । यथा – अग्निहोत्रहोम:, दर्शपूर्णमासाख्यं कर्म चेति।

### गुणकर्मण: स्वरूपम्–

संस्कारोत्पादकं कर्म गुणकर्म । गुणकर्म द्विविधम् - उपयुक्तसंस्कारकम्, उपयोक्ष्यमाणसंस्कारकश्चेति ।

**उपयुक्तसंस्कारकर्मनिरूपणम् –** तत्रोपयुक्तसंस्कारकं प्रतिपत्तिकर्म । यागे यस्य द्रव्यस्योपयोगो जातः, तस्योपयुक्तस्य द्रव्यस्य संस्कारकं कर्म प्रतिपत्तिकर्म इत्युच्यते । कृतप्रयोजनस्य द्रव्यस्य यागदेशे आकीर्णकरत्वाद् विहितदेशे तस्य प्रक्षेपणमिति प्रतिपत्तिलक्षणम् । उदाहरणं यथा - दर्शपूर्णमासकर्मणि इडाभक्षणम्, ज्योतिष्टोमयागे कृष्णविषाणप्राशनम्, दर्शपूर्णमासयागे चतुरवत्तहोमादिकम् । हुतशेषं हविर्द्रव्यं भक्षणार्थं यस्मिन् पात्रविशेषे स्थाप्यते तत् 'इडा' शब्देनोच्यते ।

**प्रतिपत्तिकर्मनिर्णयः –** आग्नेयादिप्रधानयागेषु उपयुक्तत्वादाकीर्णकरस्य पुरोडाशद्रव्यस्य प्रक्षेपरूपमिडा-भक्षणं प्रतिपत्तिकर्मेति कथनं युक्तम् । यागोपयुक्तस्य द्रव्यस्य संस्करणं प्रतिपत्तिरिति प्रतिपत्तेर्लक्षणम् । तच्च लक्षणं चतुरवत्तहोमे न संघटते । यतः चतुरवत्तहोमः यागोपयुक्तस्य द्रव्यस्य न संस्कारकः। अतः चतुरवत्तहोमस्य प्रतिपत्तिकर्मत्वं कथं स्यात्? यतः चतुरवत्तहोमस्य यागस्य च कालः समान एव । अयमभिप्रायः - यागे द्रव्यस्योपयोगे कृते सति क्रियमाणः प्रक्षेपणात्मकः संस्कारः चतुरवत्तहोमे कर्तुं न शक्यते । यतो हि चतुरवत्तस्य होमो नाम चतुर्भिरवदानैः संस्कृतस्य पुरोडाशस्याग्नौ प्रक्षेपः । स च प्रक्षेपः यागसमानकाले एव कर्त्तव्योऽस्ति। एवं च यागसमानकाले एव चतुरवत्तस्य पुरोडाशात्मकस्य द्रव्यस्य होमानुष्ठानं भवति । तेन चतुरवत्तादि द्रव्यमुपयुक्तमिति वक्तुं न शक्यते । यतस्तेन होमेन चतुरवत्तादि द्रव्यमुपयुज्यमानमर्थात् संस्कार्यमस्ति ।

**समाधानम् –**

अत्र शंका समाधीयते यत् यागक्रियायां कुत्रापि उपयुक्तस्य द्रव्यस्य यः संस्कारः, स एव प्रतिपत्तिशब्देनोच्यते । प्रतिपत्तिशब्दव्यवहारार्थं प्रधानयाग एव तदुपयोगो नावश्यकः । तदा प्रधानयागोपयुक्तस्यैव प्रतिपत्तित्वे उक्तं 'निरसनं' प्रतिपत्तिशब्देन वक्तुं न शक्येत । यतः विष्ठायाः रुधिरस्य च नोपयोगः प्रधानपशुयागे । तेन प्रधानोपयुक्तस्य संस्काररूपायाः प्रतिपत्तेर्लक्षणं 'निरसने' न घटते । अयमभिप्रायः - आदौ पशोर्विशसनं भवति । ततः तदीय- वपाहृदय-जिह्वादीनामुद्धरणं भवति । वपाहृदयाद्यंगानामुद्ध-रणसमये कस्यापि द्रव्यस्य यागोपयुक्तत्वं नास्ति । तेन प्रधान-यागोपयुक्तस्य द्रव्यस्य प्रक्षेपः प्रतिपत्तिरिति लक्षणं लोहितशकृदादिनिरसने न घटते ।

तथा ज्योतिष्टोमे कृष्णमृगस्य शरीरावयवभूतं यत् शृङ्गं, तस्य चात्वालसंज्ञके गर्ते त्यागः कर्त्तव्यः। किन्त्वस्य त्यागस्यापि प्रतिपत्तित्वं न भवेत् । यतः ज्योतिष्टोमयागाङ्गभूते कण्डूयने तद्विषाणमुपयुक्तमपि प्रधानकर्मभूते ज्योतिष्टोमे तच्छृङ्गं द्रव्यरूपेण नोपयुक्तम् । एवं स्थिते यागाङ्गभूते कण्डूयने उपयुक्तत्वेऽपि साक्षात् प्रधानयागे उपयुक्तत्वाभावात् कृष्णविषाणप्राशनस्यापि प्रतिपत्तित्वं न स्यात् । अतो न साक्षात्

यागोपयुक्तत्वं विवक्षितम् । यागे क्वापि उपयुक्तस्येत्येव विवक्षणीयम् । विवक्षमाणे तादृश उपयोगा लोहितशकृदादीनां निरसनस्यापि अस्ति । तच्च लोहित-शकृदादिकमाकीर्णकरमपि वर्त्तते, तस्य प्रतिपत्तेरावश्यकता अस्त्येव । एवमेव चतुरवत्तहोमस्यापि यथाकथञ्चिदुपयोगोऽस्त्येव । अर्थात् प्रतिपत्तिलक्षणे 'प्रधानयागोपयुक्तस्य' इति अविवक्षणेन चतुरवत्तहोमेऽपि प्रतिपत्तिलक्षणं घटते ।

स्वानुशीलनप्रश्नाः
१) गुणकर्मण: किं स्वरूपम् ?
उत्तरं- ......................................
२) अर्थकर्मण: किं स्वरूपम् ?
उत्तरं.........................................

## २.७. प्रतिपत्तिभेदा:

प्रतिपत्तिकर्म त्रिविधं भवति । यथा - १) प्रधानयागसमाप्त्यनन्तरं क्रियमाणा प्रतिपत्ति:, २) प्रधानयागसमकालीना प्रतिपत्ति:, ३) प्रधानयागपूर्वकालीना प्रतिपत्तिश्च । तत्र प्रथमाया: प्रतिपत्तेरुदाहरणं यथा - इडाभक्षणं, चतुर्धाकरणम्, शंयुवाककालभक्षणादिका । द्वितीयाया: प्रतिपत्तेरुदाहरणं - चतुरवत्तहोम इत्यादि । सकृदुपस्तरणं, द्विरवदानं, सकृदभिघारणमिति समुदितमेतच्चतुष्टयं चतुरवत्तमुच्यते । दर्शपूर्णमासप्रकरणे तानि वाक्यानि यथा - १) सकृदुपस्तृणाति, २) द्विर्हविषोऽवद्यति, ३) सकृदभिघारयति, ४) चतुरवत्तं जुहोति इति चत्वारि वाक्यानि पठितानि सन्ति । चतुरवत्तशब्देन संस्कृतपुरोडाश एवोच्यते । स च संस्कार: उपस्तरणेन, अभिघारणेन द्विवारविभागेन च क्रियते । चतुरवत्तवाक्ये 'जुहोति' पदेन होममनूद्य तत्साधनत्वेन चतुरवत्तद्रव्यं विधातुं न शक्यते। यतो हि पूर्वं होम: अप्राप्त:, तेन तस्यानुवादो न शक्य: ।

## २.८. यागहोमशब्दार्थविचार:

अत्र पूर्वपक्षी शङ्कते - 'यदाग्नेय' इति वाक्येन अत्र होमस्य प्राप्ति: न स्यात् । यतो हि 'यदाग्नेय' इति वाक्यं यागस्य विधायकमस्ति । यागहोमयोरैक्यमपि प्रतिपादयितुं न शक्यते । यतो हि देवतामुद्दिश्य क्रियमाणो मानसिको द्रव्यत्याग: यागशब्दार्थ: । देवतामुद्दिश्य च क्रियमाणो द्रव्यप्रक्षेपविशिष्टो याग: होमशब्दार्थ: । 'यदाग्नेय' इति आग्नेययागविधायकेन वाक्येन प्राप्तेऽपि यागे, तत्र वाक्ये होमबोधकस्य 'जुहोति' शब्दस्याभावेन 'चतुरवत्तं जुहोति' इति वाक्ये 'जुहोति' शब्देन होमस्यानुवादो न भवितुमर्हति । किन्तु उपस्तरण - द्विरवदान- अभिघारणवाक्यै: प्राप्तं चतुरवत्तं द्रव्यमुद्दिश्य 'जुहोति' इति पदेन तत्संस्काररूप: होम: विधीयते । अयं

प्रक्षेपात्मकसंस्कार: प्रतिपत्तिरूप एव । यत: 'अग्नये जुष्टमभिघारयामि' इत्यादिभिर्निर्देशै: यागाङ्गभूतानामग्न्यादिदेवतानां कृते यथाकथञ्चिदभिघारणादिक्रियायामुपयुक्त: पुरोडाश: प्रतिपत्तिमपेक्षते । अतस्तत्पुरोडाशावयवभूतं यद् द्व्यवदानं तत् यस्यां प्रक्षेपक्रियायां कर्म अस्ति, तादृशी प्रक्षेपक्रिया प्रतिपत्तिसंस्कारात्मिका स्वीक्रियते ।

स प्रक्षेपाख्य: प्रतिपत्तिसंस्कार: प्रधानयागानुष्ठानकाले एव कर्त्तव्यो भवति । तथाहि - 'वषट्कृते जुहोति' इत्यनेन वाक्येन विधीयमानो होम:, वषट्कारोच्चारणसमनन्तरमेव अध्वर्युणा कर्त्तव्योऽस्ति। तदानीमेव च यागस्य स्मरणार्थं विहितेन वषट्कारेण स्मारितो यागो यजमानेनानुष्ठेयो भवति । अनया रीत्या होम-यागयोश्च एकस्मिन्नेव कालेऽनुष्ठानं भवति । सर्वोऽप्ययं विषय: सर्वप्रदानाधिकरणवार्त्तिके (जै.मी. ३-४-१८-४३) विस्तरेण प्रतिपादित: । यागहोमयोरनुष्ठानस्य तुल्यकालिक-त्वात् स: प्रतिपत्त्याख्य: संस्कार: प्रधानसमकालोऽस्ति ।

## २.९.प्रधानपूर्वकाला प्रतिपत्ति:

प्रधानयागात् पूर्वं क्रियमाणाया: प्रतिपत्तेरुदाहरणं यथा- 'शकृत् सम्प्रविध्यति', लोहितं निरस्यति' इत्युभाभ्यां वाक्याभ्यां शकृत्संप्रवेधनं लोहितनिरसनं च यथाक्रमं विहितमस्ति । विषयोऽयमपि 'पशावनालम्भाल्लोहितशकृतोरकर्मत्वम्' (पू.मी. ४-१-१२-२७) इत्यधिकरणे प्रतिपादितोऽस्ति । पशुयागस्योत्पत्तिवाक्ये यागार्थं पशो: विधानमस्ति । तत: पशोर्मारणात्मकस्य विशसनस्य विधानमस्ति । तेन प्रत्यक्ष: पशु: यागे नोपयुज्यते, किन्तु तस्य पशोरङ्गानि यागे उपयुज्यन्ते । पशो: संज्ञपनानन्तरं तस्यैकादशाङ्गानि हवि:रूपेण स्वीकर्त्तव्यानि भवन्ति । अतस्तानि एकादशाङ्गानि एव यागोपयोगीनि भवन्ति। पशोरङ्गोपादानार्थमेव पशोरालम्भनं क्रियते । पशो: संज्ञपनानन्तरं तच्छरीरात् प्रवहमानस्य रुधिरस्य कृतेऽथवा तच्छरीरात् नि:सृताया: विष्ठाया: कृतेऽयं पश्वालम्भो न क्रियते ।

स्वानुशीलनप्रश्नाः
१) प्रतिपत्तिकर्म कतिविधम् ?
उत्तरं- ..........................................
२) यागस्य किं स्वरूपम् ?
उत्तरं- ..........................................

## २.१०.उपयोक्ष्यमाणसंस्कारभेदा:

अधुना उपयोक्ष्यमाणसंस्कारस्य प्रतिपादनं क्रियते । येषां द्रव्याणामुपयोग: भविष्यत् काले एव भवेत् तेषां संस्काराणां विधायकवाक्यानि उपयोक्ष्यमाण-संस्कारकनाम्ना तथा संस्कारश्च उपयोक्ष्यमाणसंस्कारनाम्ना उच्यन्ते । स च संस्कारोऽप्यनेकविध: । यथा -

१) साक्षाद्विनियुक्तसंस्कारः - प्रधानार्थमेव यः पदार्थो विहितस्तस्य संस्कारः ।

२) साक्षाद्विनियुक्तस्य यदुपकारकं तत्संस्कारः - प्रधानार्थमेव विहितस्य पदार्थस्य यः उपकारकः तस्य संस्कारः ।

३) विनियोक्ष्यमाणसंस्कारः - यस्य पदार्थस्य विनियोगोऽग्रे कर्त्तव्यः, तस्य संस्कारः ।

१) तत्र त्रिविधेषु उपयोक्ष्यमाणसंस्कारेषु आद्यस्योदाहरणं यथा - 'व्रीहीनवहन्ति' इत्यादिस्थलेषु 'व्रीहिभिर्यजेत' इत्यनेन वाक्येन यागमुद्दिश्यैव विहितानां व्रीहीणां 'व्रीहीन् अवहन्ति' इति वाक्येन अवहननात्मकः संस्कारोऽभिहितः ।

२) द्वितीयस्योदाहरणम् - 'वत्समालभेत' इति । अत्रालम्भनं नाम स्पर्शः । 'गां दोग्धि' इति वाक्येन साक्षाद् विहितस्य गोदोहनस्य उपकारको यो वत्सः तस्य स्पर्शरूपः संस्कारः ।

३) तृतीयस्योदाहरणम् - 'तप्ते पयसि दध्यानयति' इति । अस्यार्थः तप्ते दुग्धे दध्नः प्रक्षेपणम् । वाक्यमिदं चातुर्मास्ययागीये वैश्वदेवाख्ये पर्वणि उपलभ्यते । अत्र 'सा वैश्वदेव्यामिक्षा' इति वाक्ये स्थितः तच्छब्दः 'तप्ते पयसि' इति वाक्येन प्रतिपादितं दुग्धं निर्दिशति, द्वितीयस्मिन् दिने वैश्वदेवयागाङ्गत्वेन विनियोक्ष्यमाणस्य तस्य दुग्धस्य संस्कारकमिदं दध्यानयनम् । तस्मादिदं दध्यानयनं विनियोक्ष्यमाणसंस्कारक-मित्युच्यते ।

उपयोक्ष्यमाणसंस्काराणां भेदानुक्त्वा इदानीं पशुपुरोडाशयागविषये उच्यते । पशुपुरोडाशस्य यागस्तु उपयुक्ताया उपयोक्ष्यमाणायाश्च देवतायाः संस्कारार्थः । तथैव त्यागांशेऽदृष्टसम्पादनार्थः । तथाहि अत्र यागेन संस्कार्या अग्नीषोमाख्या देवता वपायागे उपयुक्ता वर्त्तते । हृदयाद्यङ्गयागेषु च सा उपयोक्ष्यमाणा वर्त्तते । दीक्षागताग्निषोम-देवतामुद्दिश्य कर्त्तव्ये पशुयागे पशोर्विदारणानन्तरं तस्य वपां निष्कास्य प्रथमतः अग्नीषोमाख्यदेवतोद्देशेन वपायागोऽनुष्ठातव्योऽस्ति । ततः पशुयागस्याङ्गभूतः पुरोडाश-यागः अग्नीषोमदेवतामुद्दिश्यानुष्ठातव्यः । तदनन्तरं पशोः हृदय- जिह्वाप्रभृत्यवयवैः अग्नीषोमदेवतामुद्दिश्य यागः क्रियते । तदा यागे त्रयोंऽशाः भवन्ति । यथा - १)देवतोद्देशः, २) द्रव्यत्यागः, ३) द्रव्यप्रक्षेपश्चेति ।

अपरमुदाहरणं प्रदर्श्य समाधत्ते । स्विष्टकृद्यागो हि द्रव्यांशेन देवतांशेन चोपयुक्तस्य संस्कारार्थो भवति । त्यागांशेन पुनरदृष्टार्थोऽपि भवति । दर्शपूर्णमासयागे प्रधानयागानुष्ठानानन्तरं 'शेषात् स्विष्टकृते समवद्यति', 'उत्तरार्धात् स्विष्टकृते समवद्यति' इत्यादि वाक्यानुरोधेन प्रधानयागे उपयुक्तस्य पुरोडाशस्य एको भागः स्विष्टकृद्यागार्थं गृह्यते, तेन स्विष्टकृद्यागस्य यः प्रक्षेपांशः स उपयुक्तसंस्कारार्थ इत्युच्यते ।

सूक्तवाकमन्त्रोच्चारणद्वारा क्रियमाणं प्रहरणमपि तथैव ज्ञातव्यम् । दर्शपूर्णमासाख्ये यागे 'सूक्तवाकेन प्रस्तरं प्रहरति' इति वाक्यानुरोधेन सूक्तवाकमन्त्रमुच्चार्य प्रस्तरद्रव्येण अनुष्ठीयमानो यागो विधीयते। प्रधानयाग- अङ्गयागयोः विहिताः देवताः प्रस्तरहोमेऽपि विहिताः सन्ति । अयं प्रस्तरहोमः प्रधानयाग -अङ्गयागयोः अनुष्ठानानन्तरमेव सम्पद्यते

। अतस्तत्पूर्वमेव तदीयदेवतानामुपयुक्तत्वात् प्रस्तरहोमीयद्रव्ये पूर्वं हविर्द्रव्यस्य स्थापितत्वात् तद्द्रव्यमपि उपयुक्तमस्ति । तेनायं प्रस्तरहोम: उद्देशांशेन प्रधानयागेऽङ्गयागे च उपयुक्तानां देवतानां संस्कारं करोति । प्रक्षेपांशेन च पूर्वं हविर्द्रव्यधारणे उपयुक्तं प्रस्तरसंज्ञकं कुशमुष्टिं संस्करोति । अत: द्रव्यांशे देवतांशे उभयांशे च यागोऽयं दृष्टार्थ: उपर्युक्तसंस्कारार्थो वा भवति ।

एवं पशुपुरोडाशयाग:, स्विष्टकृद्याग:,प्रस्तरहोमश्चेति त्रीण्युदाहरणानि प्रदर्शितानि । अन्यदुदाहरणं यथा - 'उत्तमप्रयाज:' इति । उत्तमप्रयाज: नामान्तिमप्रयाज: । 'स्वाहाकारं यजति' इति वाक्येन विहितप्रयाज उत्तमप्रयाज: । एतत्सम्बन्धिनामग्न्यादिदेवता-नामनुष्ठास्यमाने प्रधानयागे उपयोक्ष्य-माणत्वाद् देवतात्मके उद्देश्यांशेऽस्य दृष्टार्थत्वात् । अन्यदुदाहरणं यथा - हृदयादिहविर्द्रव्यस्य यागात् पूर्वं क्रियमाणो वसाहोमोऽपि वसात्मकद्रव्यांशे प्रतिपत्तिरूप: । त्यागात्मके इतरांशे च अदृष्टार्थ इति ।

## २.११. मतान्तरेण प्रतिपत्तिलक्षणम्

केचन मीमांसका: उपयोक्ष्यमाणसंस्काराद् भिन्नसंस्कारकं कर्म प्रतिपत्तिकर्म इत्याहु: । हवनेन चतुरवत्तद्रव्यं भस्तीभूतं भवति । भस्मीभूतत्वात्तस्याग्रे कोऽपि उपयोगो न भवति । अतस्तस्य द्रव्यस्य क्वापि उपयोक्ष्यमाणता नास्ति । तेनायं चतुरवत्तहोम: उपयोक्ष्यमाणसंस्काराद् भिन्न इति कृत्वा प्रतिपत्तिलक्षणं तत्र संघटते ।

स्वानुशीलनप्रश्नाः
१) पशो: कत्यङ्गानि यागोपयोगीनि भवन्ति ?
उत्तरं- ......................................
२) विनियोक्ष्यमाणसंस्कार: क: ?
उत्तरं- ......................................

## २.१२. अर्थगुणकर्मणो: प्राधान्यविचार:

कर्मण: अर्थगुणकर्मभेदेन द्वैविध्यं प्रागेव प्रतिपादितम् । इदानीं तत्र विशेष: प्रतिपाद्यते। अर्थकर्मणि द्रव्यापेक्षया कर्मण: प्राधान्यं, कर्मापेक्षया द्रव्यस्य गुणत्वं च ज्ञायते । यथा - अग्निहोत्रादौ कर्मणि दध्यादिद्रव्यस्य गुणत्वम् । गुणकर्मणि च कर्मापेक्षया द्रव्यस्य प्राधान्यं भवति, द्रव्यापेक्षया कर्मणो गुणत्वं भवति । यथा - 'व्रीहीन् प्रोक्षति', 'व्रीहीन् अवहन्ति' इत्यादौ व्रीहिगतद्वितीयाविभक्त्या व्रीहिषु प्रोक्षणक्रियाया: साध्यत्वं प्रतीयते । अत: प्रोक्षणक्रियापेक्षया व्रीह्यात्मकद्रव्यं प्रति प्राधान्यं प्रतीयते । व्रीहिद्रव्यापेक्षया च प्रोक्षणादिक्रियासु गौणत्वं प्रतीयते ।

## २.१३. गुणकर्मभेदा:

गुणकर्म चतुर्विधं भवति । यथा – उत्पत्ति– आप्ति– विकृति– संस्कृतिभेदात् । ते च कर्मभेदाः इदानीं विविच्यन्ते ।

**१) उत्पत्तिसंस्कारः –** तत्रोत्पत्तिसंस्काराख्यस्य गुणकर्मण उदाहरणं यथा – 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इति । एभिर्मन्त्रविशेषैः संभारेषु अग्नयः स्थाप्यन्ते । स्थापितेष्वग्निषु आहवनीयाद्यग्नय उत्पद्यन्ते। तेन हेतुना आहवनीयाद्यग्न्युत्पत्तौ हेतुभूतः यः आधानाख्यसंस्कारः, स उत्पत्तिसंस्कारशब्देनोच्यते ।

**२) आप्तिसंस्कारः –** आप्तिसंस्कारस्योदाहरणं यथा – 'स्वाध्यायोऽध्येतव्यः' इति । अनेन विधिना स्वाध्यायस्याप्तिलाभो भवति । अतोऽयमाप्तिसंस्कारः ।

**३) विकृतिसंस्कारः –** विकृतिसंस्कारस्योदाहरणं यथा – 'व्रीहीन् अवहन्ति' इति । अवहननसंस्कारेण व्रीहीणां वैतुष्यरूपा विकृतिः भवति । तेनायं विकृतिसंस्कारः ।

**४) संस्कृतिसंस्कारः –** संस्कृतिसंस्कारस्योदाहरणं यथा – 'व्रीहीन् प्रोक्षति' इति । अनेन प्रोक्षणद्वारा व्रीहिषु अतिशयाख्यः कश्चन अदृष्टः संस्कारः उत्पद्यते । तेनायं संस्कृतिसंस्कार इत्युच्यते । अतः प्रोक्षणस्य संस्कृतिसंस्काररूपं गुणकर्म भवति । एतेषूदाहरणेषु आधानाध्ययने स्वतन्त्रे गुणकर्मणी स्तः । कस्यापि क्रतोरङ्गभूते न स्तः, किन्तु प्रोक्षणावहनने क्रतोरङ्गभूते गुणकर्मणी भवतः ।

## २.१४. अर्थकर्मभेदाः

अर्थकर्म त्रिविधं भवति । यथा – १) नित्यकर्म, २) नैमित्तिककर्म, ३) काम्यकर्म च । तत्र 'यावज्जीवमग्निहोत्रं जुहोति', 'सायं जुहोति', 'प्रातर्जुहोति' इत्यादिभिर्वाक्यैः यावज्जीवनकालं सायं प्रातः नियमेन कर्त्तव्यतया विहितमग्निहोत्रादिकर्म नित्यकर्मेत्युच्यते। विहितसमये दर्शपूर्णमासादिकर्मणः अननुष्ठानात्मकं निमित्तमुद्दिश्य 'अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्' इत्यादिवाक्येन प्रतिपादिताः पथिकृदित्याद्याः इष्टिविशेषाः नैमित्तिककर्मशब्देनोच्यते ।

नित्यनैमित्तिककर्मणोरननुष्ठाने सति प्रत्यवायो भवति । कृते चानुष्ठाने फलं किमपि न भवतीति प्राभाकरमीमांसकाः आमनन्ति । भाट्टास्तु नित्यनैमित्तिककर्मणोः दुरितनिवृत्तिरेव फलम् । यतो हि 'नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्' इत्यादिवाक्यैर्दुरितक्षयात्मकं फलमवगम्यते । अत्रेयमाशंका समुदेति – नित्यनैमित्तिक–कर्मणोरपि फलमस्तीत्यभ्युगम्यमाने नित्यनैमित्तिककर्माण्यपि काम्यकर्मत्वेना–भ्युपगन्तव्यानि भवेयुः, तेषां फलश्रवणात् । समाधानं यथा – नित्यनैमित्तिककर्मणां फलवत्त्वे सत्यपि फलप्राप्तिमुद्दिश्य तेषामनुष्ठानं न क्रियते । किञ्च नित्यनैमित्तिकक–र्मविधायकवाक्यैः विवक्षितफलकामिनं पुरुषमुद्दिश्य तत्तत्फलप्राप्तये नित्यनैमित्तिककर्मणां विधानं न क्रियते । तेन नित्यनैमित्तिककर्माणि काम्यकर्माणीति वक्तुं न शक्यते ।

## २.१५. काम्यकर्मभेदाः

फलमुद्दिश्य यत् कर्म विधीयते, तत्काम्यकर्म इत्युच्यते। काम्यकर्म अपि त्रिविधं भवति। यथा - १) केवलमैहिकफलकम्,२)आमुष्मिकफलकम्,३) ऐहिकामुष्मिकफलकञ्चेति ।

**१) केवलमैहिकफलकम् –**अस्योदाहरणं यथा –'कारीर्या यजेत वृष्टिकामः' इत्यादि । शुष्कतामिव प्राप्तं धान्यक्षेत्रं पुनः सञ्जीवयितुमिच्छता इयं कारीरी इष्टिरनुष्ठीयते । कालान्तरे वृष्टिर्भवतु अथवा जन्मान्तरे वृष्टिर्भवतु इतीच्छया इयं कारीरीरिष्टिः न केनापि अनुष्ठीयते ।

**२) आमुष्मिकफलकम् –** अस्योदाहरणं यथा - स्वर्गाद्यर्थं दर्शपूर्णमासादिकमिति । दर्शपूर्णमासयागस्य यत् स्वर्गरूपं फलं, तदिह जन्मनि अस्मिन् लोके न लभ्यते केनापि ।

**३) ऐहिकामुष्मिकफलकम् –** अस्योदाहरणं यथा - 'वायव्यं श्वेतमालभेत भूतिकामः' इति । इह जन्मनि परजन्मनि वा यत् फलं संभवितुमर्हति तदेव ऐहिकामुष्मिकफलकं भवति । ऐश्वर्यादिजनकं फलमिह परत्र च प्राप्येत इति।

स्वानुशीलनप्रश्नाः

१) उत्तमप्रयाजस्य कोऽर्थः ?

उत्तरं- ....................................

२) काम्यकर्म कतिविधम् ?

उत्तरं- ....................................

## सारांशः

दर्शपूर्णमासयागस्य प्रयाजानुयाजादीनि अङ्गकर्माणि भवन्ति । तानि अङ्गकर्माणि श्रुतिलिङ्गादिभिः षट्प्रमाणैः प्रपञ्चितानि भवन्ति । एतेषु प्रमाणेषु श्रुत्यादीनि पूर्वं पूर्वं प्रबलानि, उत्तरोत्तरं च दुर्बलानि भवन्ति । तान्यङ्गकर्माणि सन्निपत्योपकारकआरा-दुपकारकभेदेन द्विविधानि । सामान्यतः अङ्गप्रधानरूपस्य कर्मणः अर्थकर्म-गुणकर्मभेदेन द्वैविध्यं प्रतिपादितमस्ति । आत्मगतापूर्वजनकं कर्म अर्थकर्म। अग्निहोत्रहोमः, दर्शपूर्णमासाख्यं कर्म अर्थकर्म भवति । संस्कारोत्पादकं कर्म गुणकर्म । तदपि द्विविधम् । उपयुक्तसंस्कारकं कर्म प्रतिपत्तिकर्म । यागोपयुक्तस्य द्रव्यस्य संस्करणमेव प्रतिपत्तिकर्मनाम्ना उच्यते । प्रतिपत्तिकर्म प्रधानयागपूर्वकालीनं, प्रधानसमकालीनं, प्रधानोत्तरकालीनमिति त्रिविधं भवति । उपयोक्ष्यमाणसंस्कारोऽपि त्रिविधो भवति । अर्थकर्मणि द्रव्यापेक्षया कर्मणः प्राधान्यं, कर्मापेक्षया च द्रव्यस्य गुणत्वं ज्ञायते । गुणकर्मणि च कर्मापेक्षया द्रव्यस्य प्राधान्यं भवति, द्रव्यापेक्षया कर्मणो गुणत्वं भवति । गुणकर्म उत्पत्ति- आप्ति- विकृति- संस्कृतिभेदेन चतुर्विधं भवति । अर्थकर्मापि नित्यनैमित्तिककाम्यभेदात् त्रिविधमत्र प्रतिपादितमस्ति । इति।

## पारिभाषिकशब्दा:

१) पुरोडाश: – दर्शपूर्णमासयागोपयुक्त: पिष्टकविशेष: ।
२) इडा – हुतशेषं हविर्द्रव्यं भक्षणार्थं यस्मिन् पात्रविशेषे स्थाप्यते तत् 'इडा' शब्देनोच्यते ।
३) याग:– देवतामुद्दिश्य क्रियमाणो द्रव्यत्याग: याग: ।
४) उपस्तरणम् – होमपात्रस्य घृतेन लेपनम् ।
५) अवदानम् – अङ्गुष्ठपर्वपरिमितावदेयभागधेयम् ।
६) अभिघारणम् – हविर्द्रव्ये घृतेन सेचनम् ।
७) सूक्तवाक:– अध्वर्युप्रेषितो होता यं मन्त्रं पठति स सूक्तवाक: ।
८) प्रस्तरं– कुशमुष्टि: ।

## आदर्शप्रश्ना:

### क. निबन्धात्मकप्रश्ना: (प्रत्येकं २०/१५ अङ्का:)

१) अङ्गत्वबोधकप्रमाणानि सोदाहरणं विवेचयत ।
२) श्रुतिलिङ्गयो: प्राबल्यदौर्बल्यं विचारयत ।
३) प्रतिपत्तिकर्मनिर्णयं कुरुत ।

### ख. विश्लेषणात्मकप्रश्ना: (प्रत्येकं १५/१० अङ्का:)

१) लिङ्गप्रमाणस्य भेदान् सोदाहरणं विचारयत ।
२) श्रुतिप्राबल्यं सोदाहरणमालोचयत ।
३) सन्निपत्योपकारकाङ्गं निरूपयत ।
४) यागहोमशब्दयो: भेदं विवेचयत ।
५) गुणकर्मणश्चातुर्विध्यं विशदयत ।

### ग. लघुप्रश्ना: (प्रत्येकं ५ अङ्का:)

१) श्रुतिप्रमाणं सोदाहरणं निर्णीयताम् ।
२) प्रकरणप्रमाणं सोदाहरणं विवेचयत ।
३) आरादुपकारकाङ्गं विचारयत ।
४) प्रधानपूर्वकालां प्रतिपत्तिमालोचयत ।
५) अर्थगुणकर्मणो: प्राधान्यविचारं कुरुत ।
६) क: संस्कृतिसंस्कार: ?
७) केवलमैहिकफलकं काम्यकर्म किम् ?
८) नित्यकर्मणोऽकरणे का क्षति: ?

### घ. एकाङ्कप्रश्ना: (प्रत्येकमेकाङ्क:)

१) लिङ्गं नाम किम् ?
२) अङ्गत्वं नाम किम् ?
३) अङ्गकर्माणि कतिविधानि सन्ति ?
४) यागस्य किं स्वरूपम् ?
५) गुणकर्मण: किं स्वरूपम् ?
६) क: उत्पत्तिसंस्कार: ?
७) नित्यकर्मणोऽकरणे का हानि: ?
८) प्रयाजानुयाजौ कस्य यागस्याङ्गकर्मणी ?
९) उपयोक्ष्यमाणसंस्कार: कतिविध: ?
१०) अर्थकर्मण: किं स्वरूपम् ?

**एकाङ्कस्योत्तराणि**

१) सामर्थ्यम्,
२) शेषत्वम्,
३) द्विविधानि,
४) द्रव्यदेवते हि यागस्वरूपम्,
५) संस्कारोत्पादकं कर्म गुणकर्म,
६) आधानाख्यसंस्कार: उत्पत्तिसंस्कार:,
७) प्रत्यवाय:,
८) दर्शपूर्णमासयागस्य,
९) त्रिविध:,
१०) आत्मगतापूर्वजनकं कर्म ।

*******

# तृतीयखण्डः–वेदस्यालौकिकार्थबोधकत्वमित्यस्मात् विरुद्धत्रिकविचारान्तम्

संरचना

३.१. प्रस्तावना
३.२. उद्देश्यम्
३.३. वेदस्यालौकिकार्थबोधकत्वम्
३.४. विधिवाक्यस्य विधायकत्वविचार:
३.५. आर्थीभावनानिरूपणम्
३.६. शाब्दीभावनानिरूपणम्
३.७. शाब्दीभावनाया: अंशत्रयम्
३.८. भावनालक्षणम्
३.९. ज्योतिष्टोमादीनां नामत्वप्रतिपादनम्
३.१०. तत्प्रख्यादिहेतुविचार:
३.११. विरुद्धत्रिकविचार:

## ३.१. प्रस्तावना

अलौकिकयोर्धर्माधर्मयोर्विषये वेदा: प्रमाणभूता: भवन्ति । मीमांसायां वेदस्यालौकिकत्वं प्रतिपादितमस्ति । तत: विधिवाक्यस्य विधिबोधकत्वं विचारितमस्ति। पुरुषस्य यागादिकर्मसु प्रवृत्त्यर्थं भावनाया: प्रतिपादनं मीमांसकै: क्रियते । सा च भावना आर्थी–शाब्दीभेदेन द्विविधा मीमांसापरिभाषायां आलोचिता । मीमांसापरिभाषायां यागादीनां नामधेयत्वस्वीकारार्थं चत्वारि कारणानि प्रदर्शितानि सन्ति । तत्प्रख्य –तद्व्यपदेश – यौगिक– वाक्यभेदैश्चतुर्भि: यागनामत्वं स्वीक्रियते । योगवशान्नामधेयास्वीकारे कदाचिद् विरुद्धत्रिकद्वयमापतेत् । तस्य च विरुद्धत्रिकस्य विचारोऽत्र सन्निविष्टोऽस्ति । अस्मिन् पाठ्यांशे एते विषया: आलोच्यन्ते।

## ३.२. उद्देश्यम्

अस्मिन् पाठ्यांशे मुख्या: ध्यानबिन्दव: निम्ने प्रतिपादिता: सन्ति ।

- वेदस्यापौरुषत्वविचारविषयेऽत्र आलोचनं भवेत् ।
- भावनाया: स्वरूपविषये भेदविषये च भवद्भि: ज्ञातुं शक्येत ।
- यागनामधेयत्वस्वीकारे तत्कारणानां ज्ञानं भवतां जायेत ।
- विरुद्धत्रिकविचारविषये भवन्त: ज्ञातुं पारयेयु: ।

## ३.३. वेदस्यालौकिकार्थबोधकत्वम्

अलौकिकयोर्धर्माधर्मयोर्विषये वेदा: प्रमाणरूपेण स्वीक्रियन्ते । अयं विचार: प्रागेव प्रतिपादित:। तत्रेत्थं शङ्का उत्पद्यते यत् दर्शपूर्णमासादिकर्माणि व्रीह्यादिद्रव्याणि च सर्वेषां प्रत्यक्षत्वात्, तानि लौकिकान्येव। अतस्तत्प्रतिपादको वेद: अलौकिकार्थस्य प्रतिपादक इति कथमुच्येत ? तत्रोत्तरमुपस्थापयति ग्रन्थकार: - यद्यपि दर्शपूर्णमासादिकर्माणि प्रत्यक्षाणि तथापि तानि कर्माणि स्वर्गादिफलस्य साधनभूतानि । अयं विषयश्चाप्रत्यक्ष एव । अनया रीत्या फलसाधनत्वेन कर्मणां कर्त्तव्यताप्रतिपादकस्य वेदस्यालौकिकार्थबोधकत्वमस्त्येव । कर्मणो य: फलसाधनत्वाकार: सोऽप्रत्यक्ष एव । अत: वेदस्यालौ- किकार्थबोधकत्वमक्षतमेव । तथैव व्रीह्यादिद्रव्याणां यत् यागादिक्रियोत्पादकत्वमुक्तं तदपि प्रत्यक्षादिलौकिकप्रमाणैरनवगतमस्ति । तेन तद्बोधको वेद:, अलौकिकार्थबोधक एवेति वेदस्य अलौकिकार्थबोधकत्वस्वीकारे न किमपि बाधकं भवेत् ।

## ३.४. विधिवाक्यस्य विधायकत्वविचार:

इदानीं विधिवाक्यस्य विधिबोधकत्वविचार: उपस्थाप्यते । वाक्ये प्रत्ययार्थस्यैव प्राधान्यात् विधिवाक्यान्तर्भूतानामंशानां विषये प्रथमत: कथयति। 'स्वर्गकामो यजेत' इत्यस्मिन् विधिवाक्ये यज्धातूत्तरवर्त्तिनि तप्रत्यये धर्मद्वयमस्ति । १) आख्यातत्वं, २) लिङ्त्वं चेति । तत्राख्यातत्वधर्म: दशसु लकारेषु समान एव । भगवता पाणिनिना भिन्नभिन्नक्रियाणां भूत - भविष्यद्- वर्त्तमानरूपाणां कालानां बोधनाय तथा आज्ञार्थ- विध्यर्थ- संकेतार्थाशीर्वादादीनामर्थानां बोधनाय च दशलकारा: निर्दिष्टा: सन्ति । दशानां प्रत्येकं लवर्णघटितत्वादिमे 'लकारा' इत्युच्यन्ते । आख्यातत्वधर्मेण युक्त: ज्ञातो वा लिङ्प्रत्यय: पुरुषप्रवृत्तिरूपामार्थभावनां प्रतिपादयति ।

## ३.५. आर्थीभावनानिरूपणम्

आर्थीभावनाया: किं, केन, कथमिति अंशत्रयं विद्यते । एवमंशत्रयविशिष्टा साऽऽर्थीभावना। तथाहि 'यजेत' इति श्रुते: प्रथमं तद्गतेन प्रत्ययत्वरूपेण धर्मेण भावयेत् सम्पादयेद्वा इत्यर्थ: प्रतीयते । यतो हि सुबन्तपदबोधितानां सर्वेषां कारकाणामन्वय: तिङन्तपदेन बोधिताया क्रियाया कर्त्तव्य: इति नियमोऽस्ति। कारकाणां क्रिययैवान्वय: । तेन तिङन्तार्थस्यैव प्राधान्यं प्रतीयते । तत्रापि प्रकृत्यर्थापेक्षया प्रत्ययार्थस्यैव प्राधान्यात् प्रथमं प्रत्ययार्थभावनाया उपस्थितिर्युज्यते । तदनन्तरं तस्यां भावनायां कृधातुना समानार्थकस्य सकर्मकत्वात् 'किं भावयेत्', 'किं कुर्यात्', 'किं सम्पादयेत्' इति साध्यमाकांक्षितं भवति । यद्यपि 'यजेत' इत्येकेन पदेन उपस्थितोऽपि धात्वर्थो याग:, तथापि तस्य कर्मत्वेनान्वयो न भवति । यतो हि यागात्मकं कर्म कष्टात्मकम् । तेन तत् ईप्सिततमात्मकं कर्म नैव भवितुं शक्नोति । किन्तु स्वर्गस्यानन्दरूपत्वात् स एव ईप्सिततमोऽत्यन्तमिष्टतमो वा भवति । अतस्तस्यैव साध्यत्वेन प्रत्ययार्थभावनायामन्वययोग्यता विद्यते । ततश्च 'स्वर्गं भावयेत्' इत्यर्थबोधो भवति ।

स्वर्गस्य साध्यत्वेनान्वयानन्तरं भावनाया भाव्यांशः निर्णीतः । तदनन्तरं करणाकाङ्क्षां निरूपयति । स्वर्गात्मकस्य फलस्य भाव्यत्वेनान्वये कृते भावनाया भाव्याकांक्षायां 'स्वर्गं भावयेत्' इत्यर्थबोधो भवति । तदनन्तरं केन इति तृतीयान्तपदेन साधनात्मकद्वितीयांशस्याकांक्षा भवति । तदा 'यजेत' इति पदे धात्वर्थस्य यागस्य करणत्वेन भावनायामन्वये कृते सति 'यागेन स्वर्गं भावयेत्' इत्यर्थबोधो भवति । तदनन्तरं 'कथं स्वर्गं कुर्यात्' इति कथंभावस्य इतिकर्त्तव्यतायाः वाऽऽकांक्षा जायते । तदा अग्नेरन्वाधानं कृत्वा अवहननादिकं च कृत्वा दृष्टमुपकारं सम्पाद्य तथैव प्रयाजादीनामनुष्ठानेनादृष्टमुपकारं सम्पाद्य 'तत्सहितेन यागेन स्वर्गं सम्पादयेत्' इत्यर्थस्य प्रतीतिर्भवति । ततश्च अग्न्यन्वाधान- प्रयाजादीनामङ्गानामिति-कर्त्तव्यतारूपेण भावनायामन्वयो भवति । यैरङ्गैः कथम्भावाकांक्षा परिपूरिता भवति तदेवेतिकर्त्तव्यता-पदेनोच्यते।

अपरमुदाहरणं यथा - 'ओदनकामः पचेत्' इति । ओदनेच्छुना पुरुषेण पाकः कर्त्तव्यः। अस्मिन् वाक्ये लिङ्त्वधर्मेण भावनायाः प्रतीतिर्भवति । तथाहि 'किं भावयेत्' इति साध्याकाङ्क्षायां सत्याम् 'ओदनम्' इति भाव्यत्वेन भावनायामन्वितं भवति । केन साधनेन इत्याकांक्षायां सत्यां 'पाकेन' इत्यनेन पदेन करणाकांक्षा पूर्णा भवति । तदनन्तरं कथंभावाकांक्षायां सत्यां तृणकाष्ठसंयोजनफूत्कारादिकं विधाय पचनं कुर्यादित्यर्थः प्रतीयते । एवं च 'तृणफूत्कारादिभिरङ्गैरुपकृतेन पाकेन ओदनं भावयेत्' इति वाक्यार्थः सिध्यति। तद्वद् वेदेऽपि 'यजेत' इत्यत्र विज्ञेयम् । इत्थमंशत्रयविशिष्टाया आर्थभावनाया वाक्यार्थः प्रतिपादितः।

स्वानुशीलनप्रश्नाः
१) सर्वलकारसाधारणं किम् ?
उत्तरं- ........................................
२) आर्थभावनायाः साधनाकाङ्क्षायां कोऽन्वेति ?
उत्तरं- ..........................................

## ३.६. शाब्दीभावनानिरूपणम्

इदानीं शाब्दीभावनां निरूपयति । 'स्वर्गकामो यजेत' इत्यस्मिन् वाक्ये यजेतपदस्थितस्य लिङ्प्रत्यय एव लिङ्त्वेन रूपेण प्रेरणात्मिकां शाब्दीभावनां प्रतिपादयति । लोकव्यवहारेऽपि 'गाम् आनय' इत्यादि गुरुवाक्यं श्रुत्वा शिष्यः स्वमनसि विचारयति यत् मदीय आचार्यः 'गामानय' इति वाक्येन गामानेतुं मां प्रेरयति । ईदृशं प्रेरणारूपं व्यापारं ज्ञात्वैव शिष्यो गामानेतुं प्रवर्त्तते ।

एवं च 'लिङादीनां श्रवणे सति प्रेरणाज्ञानं भवति, लिङ्घटितवाक्योच्चारणस्यान्वयव्यतिरेकाभ्यां निश्चीयते यत् प्रेरणाज्ञानं लिङादिश्रवणेनैव

भवति । अत: प्रेरणैव लिङादीनामर्थ: । यस्य यत्र शक्ति: स एव तस्यार्थ: इति नियमानुरोधेन लिङादे: प्रेरणायां शक्तिरिति लोके विज्ञायते । तथैव वेदेऽपि प्रेरणैव लिङादीनामर्थ: इत्यभ्युपगम: समुचित: । लोकवेदयोरियान् विशेष: - लोकव्यवहारे तावत् गवानयनादिप्रवृत्तिजनक: प्रेरणाख्यो व्यापार: प्रयोक्तृपुरुषमनोगत: अभिप्रायविशेषो भवति । किन्तु वेदस्तु अपौरुषेय:। अतस्तत्र प्रवर्त्तयितुं कोऽपि प्रयोक्तृपुरुषो नास्ति । तस्मात् लिङादिशब्देष्वेव प्रवृत्तिजनको व्यापारस्तिष्ठतीति स्वीक्रियते। तस्य प्रेरणाख्यस्य व्यापारस्य लिङादिशब्दनिष्ठत्वादेव स 'प्रेरणाख्यो व्यापार:' शाब्दभावनाशब्देनोच्यते । इयं शाब्दीभावनैव वैदिकयागहोमादिविषयेषु पुरुषं प्रेरयति । सा शाब्दीभावना पुरुषप्रवृत्तौ कारणं भवति ।

## ३.७. शाब्दीभावनाया: अंशत्रयम्

इयं शाब्दीभावनाऽपि अंशत्रयविशिष्टा भवति ।

१)तस्यां शाब्दभावनायां पुरुषप्रवृत्तिरूपाया: आर्थभावनाया: भाव्यत्वेन अन्वयो भवति ।

२) अध्ययनेनावगतानां लिङादीनां साधनरूपेणान्वयो भवति ।

३)अर्थवादवाक्यै: प्रतिपादितस्य प्राशस्त्यज्ञानस्य कथंभावरूपेण इतिकर्त्तव्यतात्वेन वाऽन्वयो भवति ।

तदा शाब्दभावनाया: शाब्दबोधस्य स्वरूपमिदं निष्पद्यते - अङ्गसहितस्य वेदस्याध्ययनकर्त्तार: पुरुषा: व्याकरण- निघण्टु- निरुक्तादीनां साहाय्येन प्राप्तज्ञाना: सन्त: प्राशस्त्यज्ञानपूर्वकैरध्ययनद्वारा विज्ञातस्वाध्याये स्थितै: लिङादिभि: यागादिकर्म स्वकर्त्तव्यत्वेन विज्ञाय यागादीनामनुष्ठानं कुर्युरिति शाब्दभावनाबोध: । तेन साऽऽर्थभावना शाब्दभावनाया: साध्यत्वेनान्वेतीति बोद्धव्यम् ।

इयं शाब्दीभावना ज्योतिष्टोमादिकर्मविधायकेषु भिन्नभिन्नवाक्येषु यद्यपि स्वरूपेण प्रतीयते, तथापि सा विधेयरूपेण न प्रतीयते । यतस्तेषु वाक्येषु कर्त्तव्यत्वेन आर्थभावनाया एव बोधो भवति । 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादि प्रत्येकवाक्येषु आर्थभावना प्रतीयते ।

मीमांसाशास्त्रे भावनाया एव विधेयत्वं, न तु यागादिकर्मणां, तेषां करणत्वेन अप्राधान्यात् । अत्र विचार: प्रवर्त्तते - किमार्थभावनाया: विधेयत्वम्, उत शाब्दभावनाया: । तत्र शाब्दभावनाया: शब्दवृत्तिव्यापाररूपत्वेन नित्यत्वेन च अनुष्ठानायोग्यत्वात् । आर्थभावनाया एव पुरुषवृत्तिव्यापाररूपत्वेन साक्षात् फलजनकत्वेन च विधेयत्वमित्येवंरूपेण कर्त्तव्यत्वं ज्ञायते । किन्तु शाब्दभावनाया: कर्त्तव्यरूपेण प्रतीति: 'स्वाध्यायोऽध्येतव्य:' इत्यस्मिन् वाक्ये एव । अत्रैवं शङ्कते - 'स्वाध्यायोऽध्येतव्य:' इत्यस्मिन् वाक्येऽपि आर्थभावनैव विधेयाऽस्ति । तत्रोत्तरं दीयते 'स्वाध्यायोऽध्येतव्य:' इति वाक्ये स्थिताऽऽर्थभावनैव सर्वेष्वपि विधिवाक्येषु शाब्दभावनारूपेण वर्त्तते । 'स्वाध्यायोऽध्येतव्य:' इति विधिवाक्यस्य विध्यर्थकप्रत्यय-

वाच्यायां शाब्दभावनायां स्वाध्यायपदवाच्यसकलविधिवाक्यस्थलिङादिवाच्यशाब्द-भावना साध्यत्वेना-न्वयात्। 'स्वाध्यायोऽध्येतव्यः' इति विधेरर्थज्ञानरूपदृष्टार्थत्वेन व्यवस्थापनात् तत्तत्शब्दभावनाविषयकज्ञानस्यैव साध्यत्वाङ्गीकारात् ।

तथाहि-'अधि'उपसर्गपूर्वकात् 'इङ् अध्ययने' इति धातोः सकाशात् तव्यप्रत्ययो विहितोऽस्ति। अत्र कर्म 'स्वाध्यायः', तदेव च प्रधानम् । तस्य स्वाध्यायस्य संस्कारकमध्ययनमस्ति । तच्च ब्रीहिसंस्कारकं प्रोक्षणमिव गुणकर्मास्ति । अध्ययनोत्पन्नेन स्वाध्यायग्रहणात्मकेन संस्कारेण युक्तस्य स्वाध्यायजनितज्ञानरूपस्य संस्कारविशिष्टस्य स्वाध्यायस्य फलाकाङ्क्षायां सत्यां स्वाध्यायनिष्ठैः तत्तल्लिङादिप्रत्ययविशिष्टवाक्यैः स्वसामर्थ्येन अनुष्ठानोपयोगियागादिरूपमर्थज्ञानं कार्यते । तदेवार्थज्ञानं स्वाध्यायस्य दृष्टं प्रयोजनमिति स्वीक्रियते । दृष्टत्वादेव तत्तत्कर्मणामनुष्ठानद्वारा स्वर्गात्मकस्यालौकिकस्य श्रेयसः साधनमिति स्वीक्रियते । अतोऽर्थज्ञानपूर्वकं कर्मानुष्ठानमेव स्वाध्यायस्य प्रयोजनमिति स्वीकर्त्तव्यम् । दृष्टे फले संभवति सति अदृष्टफलं नाङ्गीकर्त्तुं युज्यत इति नियमानुरोधेन स्वाध्यायस्यादृष्टं प्रयोजनं नाङ्गीकियते।

ततश्चैतत् सिद्धं भवति यत् 'स्वाध्यायोऽध्येतव्यः' इति विधिरेव स्वाध्यायात्मके वेदे स्थितेन विधिवाक्यगतलिङादिना प्रतिपादिताः अंशत्रयसहिताः समस्ताः शाब्दभावनाः कर्त्तव्यत्वेन प्रतिपादयति । साङ्गवेदाध्ययनेन गृहीतपदपदार्थो व्युत्पन्नः पुरुषः अध्ययनद्वारा गृहीतस्वाध्यायगतैर्लिङादिभिः अर्थवादवाक्यावग-तप्राशस्त्यरूपाङ्गसहितैः 'प्रयोजनयुक्ताः यागादयः कर्त्तव्याः' इत्यवबुध्य तेषामनुष्ठानं कुर्यात् । अनया रीत्या शाब्दभावनायां पुरुषप्रवृत्तिरूपायाः आर्थभावनायाः भाव्यत्वेन अध्ययनेन ज्ञातस्य लिङादेः साधनत्वेनार्थवादवाक्यैरवगतस्य प्राशस्त्यस्य इतिकर्त्तव्यतात्वेन कथंभावत्वेन वाऽन्वयात् शाब्दभावनाऽपि आर्थभावनाया इव अंशत्रयमपेक्षते ।

आर्थभावनायां सर्वाभिलषितस्य स्वर्गस्य साध्यत्वेन प्रतीतिरपि विधिसामर्थ्येनैव भवति। यतो हि पुरुषार्थरूपाणां स्वर्गादीनां साधनानि यागादिकर्माणि न भवन्ति चेत् तत्र पुरुषं प्रवर्त्तयितुं प्रवर्त्तनारूपो विधिरसमर्थो भवेत् । प्रवर्त्तनायाः प्रवृत्त्यनुकूलव्यापाररूपत्वात् स्वभाव्यायाः पुरुषप्रवृत्तेः विषयो भवति । तस्मात् सः विधिः स्वस्य पुरुषप्रवृत्तिरूपेण साध्येन सिद्धिं प्राप्यमाणा ज्योतिष्टोमादयो यागाः, सर्वाभिलषितस्वर्गादिफलानां साधनानि इति सूचयति । अन्यथा विधेः प्रवर्त्तनापरत्वमेव न स्यात् । प्रेरणैव विधेः स्वरूपम् । पुरुषप्रवृत्तिं प्रति हेतुभूतः व्यापार एव प्रवर्त्तनाशब्देनोच्यते । 'जुहोति' इत्यादिस्थलेषु लट्लकारस्यैव प्रयोगेण प्रवर्त्तनायाः संभवो नास्ति । अतस्तत्रार्थभावनायाः पुरुषार्थरूपेण स्वर्गादिसाध्येन भाव्यत्वनियमो न भवेत् ।

स्वानुशीलनप्रश्नाः

१) शाब्दभावनायाः साध्याकाङ्क्षायां कस्यान्वयो भवति ?

उत्तरं- ................................................

२) मीमांसाशास्त्रे कस्य विधेयत्वं स्वीक्रियते ?

उत्तरं- ..................................................

## ३.८. भावनालक्षणम्

उत्पद्यमानस्य प्राप्यमाणस्य वा पदार्थस्योत्पत्तौ प्राप्तौ वा साधनीभूतः प्रयोजकव्यापारो भावना इत्युच्यते । उत्पद्यमानस्य ओदनस्य प्राप्यमाणस्य वा स्वर्गस्योत्पत्तौ प्राप्तौ वा साधनीभूतो व्यापारः आर्थभावनायां पुरुषप्रवृत्तौ वर्त्तत इति कृत्वा लक्षणं संघटते । शाब्दभावनायामपि पुरुषप्रवृत्तिरूपसाध्यस्य साधको व्यापारो भवत्येव । तेनात्रापि लक्षणसंगतिर्भवति ।

## ३.९. ज्योतिष्टोमादीनां नामत्वप्रतिपादनम्

वेदाः धर्मं बोधयन्ति । वेदः पञ्चधा विभज्यते । ते यथा - विधि-मन्त्र-नामधेय- निषेध- अर्थवादाः । इदानीमत्र नामधेयस्य निरूपणं क्रियते । अत्रैवं शङ्का समुद्भवति - 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति । अस्य वाक्यस्य 'यागेन स्वर्गं भावयेत्' इत्यर्थे कृते सति 'ज्योतिष्टोम'पदस्यान्वयः कथं भवति ? किन्तु नेयमाशङ्का कार्या । यतो हि भावनायां करणत्वेनान्वितस्य यागस्य 'ज्योतिष्टोम' इति नामधेयमस्ति । अर्थात् ज्योतिष्टोमपदस्य यागे नामत्वेनान्वयो भवति । तस्मात् ज्योतिष्टोमसंज्ञकेन यागेन स्वर्गं सम्पादयेदित्यर्थो भवति ।

विधिनिरूपणानन्तरं नामधेयस्य निरूपणाय पुनः शङ्कते -ज्योतिष्टोमपदं यागस्य नामधेयं कथं भवति ? तत्रेदमुत्तरम् - 'ज्योतिराख्यास्त्रिवृदादिस्तोमाः' इति । ज्योतिसंज्ञकाः 'त्रिवृद्' इत्यादयः 'स्तोमाः' यस्मिन् सन्ति- स ज्योतिष्टोमः इति व्युत्पत्त्या तस्य यागनामत्वम् । अत्र पुनः शङ्कते ज्योतिष्टोमयागे त्रिवृदादिस्तोमानां सम्बन्धोऽस्तीति कथं ज्ञायते ? तत्रोत्तरम् - 'त्रिवृत्, पञ्चदशः सप्तदश एकविंश, एतानि वाक्यानि ज्योतींषि य एतस्य स्तोमाः' इत्याद्यन्येन विधिवाक्येनैतद्वाक्यान्तर्गतेन 'एतस्य' इति एतच्छब्देन तस्य ज्योतिष्टोमयागस्य निर्देशः कृतोऽस्ति । तेन ज्योतिष्टोमपदं यागनामधेयमस्तीति निश्चीयते । एवमेव मीमांसाशास्त्रोक्त-तत्प्रख्यादिभिः तत्तत्स्थलेषु नामधेयं विज्ञेयम् ।

स्वानुशीलनप्रश्नाः
१) पुरुषप्रवृत्तिं प्रति हेतुभूतव्यापार: केन शब्देनोच्यते ?
उत्तरं- ..............................................
२) ज्योतिष्टोमपदस्य यागे केनरूपेणान्वयो भवति ?
उत्तरं- ..................................................

## ३.१०. तत्प्रख्यादिहेतुविचार:

मीमांसाशास्त्रे तावत् १) तत्प्रख्य- २) तद्व्यपदेश- ३) यौगिक- ४) वाक्यभेदकारणै: चतुर्भि: प्रकारै: नामधेयत्वं निर्णीयते ।

**१) तत्प्रख्यशास्त्रम् –** नामधेयहेतुषु प्रथमत: तत्प्रख्यशास्त्रस्योदाहरणं प्रदर्शयति यथा – 'अग्निहोत्रं जुहोति' इत्यस्मिन् वाक्ये अग्निहोत्रशब्देनावगताया: अग्निदेवताया: 'अग्निर्ज्योतिर्ज्योतिरग्नि: स्वाहेति सायं जुहोति' इति मन्त्रेण सायंकालीनहोमाङ्गत्वेन प्राप्तिरस्ति । तस्मात् अग्निहोत्रशब्देन अग्निदेवतारूपो गुणो न विधीयते। अत्र तु 'अग्निर्ज्योतिर्ज्योतिरग्नि: स्वाहेति सायं जुहोति' इति वाक्यविहितेन मन्त्रेणाग्निदेवताया: प्राप्तिरस्ति । अत: 'अग्निर्ज्योति...' इति अग्निप्रापकशास्त्रेण प्राप्तमग्निसम्बन्धं निमित्तीकृत्य 'अग्नये होत्रं यस्मिन्' इति बहुव्रीहिसमासेन अग्निहोत्रपदं होमस्य नामधेयमिति स्वीक्रियते । तत्प्रख्यं नाम तस्य देवतारूपगुणस्य प्रकाशकं शास्त्रान्तरमस्ति। तस्य पुनर्विधानेऽनुवादत्वापत्तेरग्निहोत्रपदं नामधेयं भवति । अत्र पुन: शङ्कते – आख्यातप्रत्ययेन बोधितामर्थभावनां प्रति होमस्य साधनत्वेन तन्नामधेयत्वादग्निहोत्रशब्दस्यापि साधनत्वेन भवितव्यम् । ततश्च 'ज्योतिष्टोमेन' इत्यादौ संज्ञाशब्दात् यथा तृतीयाविभक्ति: प्रयुज्यते, तद्वदेव 'अग्निहोत्रे'ति संज्ञाशब्दात् तृतीयाविभक्त्या भवितव्यम् ।

तत्रोत्तरं दीयते – यद्यपि प्रकृतस्थले साक्षात् तृतीयाविभक्ते: प्रयोग: न कृत:, तथापि 'अग्निहोत्रम्' इति द्वितीयाविभक्तिरेव लक्षणया करणत्वार्थं बोधयति । 'नासाधितं करणम्' इत्यस्यार्थ: स्वयमसिद्धं वस्तु परत्र साधनं न भवितुमर्हति इति न्यायेन असाधितस्य करणत्वं न भवितुमर्हति। सिद्ध: पदार्थ एव साधनं भवितुमर्हति । यद् विद्यमानमेव नास्ति, तस्मादविद्यमानपदार्थात् कार्योत्पत्ति: नैव संभवितुमर्हति । यावच्च कार्योत्पत्तिर्नास्ति तावत् करणत्वं नोपपद्यते । अनेन प्रकारेण अग्निहोत्रगत- द्वितीयाविभक्तेरुपपत्त्या तत्प्रख्यन्यायेन अग्निहोत्रशब्दस्य होमनामधेयत्वमिति निर्णय: ।

**२) तद्व्यपदेशशास्त्रम् –** 'श्येनेनाभिचरन् यजेत' इत्यादिस्थले श्येनपदं तद्व्यपदेशन्यायेन यागस्य नामधेयमस्ति । श्येनपक्षिरूपगुणस्य यागाङ्गत्वेन

विधानं नास्ति। अन्यथा 'यथा वै श्येनो निपत्यादत्ते, एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरति श्येनेन'। यथा श्येनपक्षी क्षुद्रजन्तूनाक्रम्य तान् गृह्णाति, तद्वत् 'श्येनेनाभिचरन् यजेत' इति वाक्यविहितो यागः द्विषन्तं शत्रुमाक्रम्य हन्ति इति अर्थवादवाक्येन प्रतिपादितस्य उपमानोपमेयभावस्यानुपपत्तिः स्यात् । यथाश्येनसंज्ञकः कर्मविशेषः द्विषन्तं शत्रुं निपत्य आदत्ते । अत्र व्यपदेशेन उपमानोपमेयभावेन कर्मणो नामधेयत्वपक्षे एव उपपद्यते । तद्व्यपदेशः यत्र अस्ति तत् शास्त्रं तद्व्यपदेशम् । एवञ्चोपमानद्वारा यत्र प्रकृतविषयो वर्ण्यते, स व्यपदेशपदेनोच्यते । गुणविधिपक्षे एकस्मिन्नेव पदार्थे स्वस्य स्वेनैव उपमानोपमेयभावः स्यात् । एवं स्वीकर्तुं न शक्यते । यतो हि भिन्नयोरिव पदार्थयो-रुपमानोपमेयभावो भवति । तस्मात् श्येनपक्षिणः सादृश्यवर्णनेन श्येनपदं कर्मणो नामधेयमेवेति स्वीक्रियते । ततश्चेत्थं वाक्यार्थो निष्पद्यते- 'शत्रुवधकामः पुरुषः श्येनसंज्ञकेन यागेन अभिचारं कुर्यात्'इति।

अत्रैवं शङ्कते - यदि अभिचारः वेदेन प्रतिपादितः, तर्हि आभिचारिके कर्मणि धार्मिकाणां पुरुषाणामपि सततप्रवृत्तिर्भवेत् । तत्र समाधानं यथा - नैवमाशङ्कनीयम् । यद्यपि वेदेनाभिचारः प्रतिपादितः तथापि तेन स न विहितः। अभिचारश्च फलरूपः । फलं कदापि विधेयं न भवति । किन्तु फलमुद्दिश्य तत्साधनत्वेन कर्मैव विधेयं भवति इति सिद्धान्तः । अयं च सिद्धान्तः चतुर्थाध्यायस्य प्रथमाधिकरणे द्वितीये वर्णके प्रतिपादितः । अतो वेदेऽभिचारस्य विधानाभावेन सोऽभिचारः प्रत्यवायजनकः । तेनाभिचारिके कर्मणि धार्मिकाणां प्रवृत्तिर्न स्यात् ।

स्वानुशीलनप्रश्नाः

१) नामधेयः कैः हेतुभिः स्वीक्रियते ?

उत्तरं- ................................................

२) तत्प्रख्यशब्दस्य कोऽर्थः ?

उत्तरं- ................................................

**३) यौगिकशास्त्रम् -** अनेनैव प्रकारेण 'उद्भिदा यजेत' इत्यस्मिन् वाक्ये पशुरूपफलमुद्दिश्य कर्त्तव्यत्वेन विहितस्य यागस्य 'उद्भिद्' इति नामधेयमस्ति । नहि यथाकथञ्चित् प्राप्तं यागमुद्दिश्य उद्भिद्रूपो गुणोऽत्र विधीयते । यतो हि दध्यादिद्रवपदार्थ इव उद्भित्संज्ञकः कश्चन गुणो लोके प्रसिद्धोऽस्ति । किन्तु उद्भित्पदस्य कस्यापि द्रव्यस्य वाचकत्वाभावात् तद्गुणविधायकमिति वक्तुं न शक्यते । यागनामधेयत्वपक्षे 'उद्भिद्यते फलमनेन स उद्भित्' इति यौगिकव्युत्पत्त्याऽवयवार्थः संभवति । अत 'उद्भिद्' इति यागस्य नामधेयमिति स्वीकार्यम् ।

अत्र शङ्कते - येन भूमिः खन्यते स उद्भित् इति यौगिकव्युत्पत्त्या उद्भित्शब्दस्य खनित्रवाचकत्वमपि संभवति । तेन प्रकृते खनित्रादिगुणस्य विधानं कथं न स्वीक्रियते ?

तत्रोत्तरं – तथा वक्तुं न शक्यते । यतो हि तथा स्वीकारे परस्परविरुद्धं त्रिकद्वयमङ्गीकर्त्तव्यं भवेत् । त्रिकद्वयमङ्गीकारश्च दोषावहः। तथा च कारिका –

'प्राधान्यमनुवाद्यत्वमुद्देश्यत्वमिति त्रिकम् ।
गुणभावो विधेयत्वमुपादेयत्वमित्यपि ।।'इति ।।

## ३.११. विरुद्धत्रिकविचार:

विरुद्धत्रिकद्वयं यथा – 'उद्भिदा यजेत पशुकाम:' इत्यत्र प्रमाणान्तरेणाप्राप्तं यागमुद्दिश्य उद्भिद्रूपस्य गुणस्य विधानासंभवात् पशुकर्मकभावनायां यागस्य करणत्वेन विधानमवश्यं भवति। पशुरूपं साध्यं यस्यास्तादृशी याऽऽर्थभावना सा पशुकर्मकभावना । तेनायमर्थ: सम्पन्न: 'यागेन पशून् भावयेत्' इति। अतो यागे विधेयत्वं सम्पद्यते । तथैव फलं प्रति यागस्याङ्गत्वेन प्रतीयमानत्वात्तस्यैव गुणत्वमपि सम्पद्यते । तथैव पुरुषेण फलप्राप्त्यर्थं यागस्यानुष्ठीयमानत्वात् यागस्योपादेयत्वमपि सम्पद्यते । एवञ्च 'विधेयत्वम्, गुणत्वम्, उपादेयत्वं' चेति एकं त्रिकं यागे अस्ति । एतच्च यागविधिपक्षे सम्पन्नम् । अनन्तरं यागमुद्दिश्य 'उद्भिद्रूपगुणविधानपक्षे विधित्सितस्य उद्भिद्रूपस्य गुणापेक्षया यागस्य प्राधान्यम्, उद्देश्यत्वम्, अनुवाद्यत्वं चेति भवति । तेनेदमपरं त्रिकं यागेऽस्ति । इदं परस्परविरुद्धं त्रिकद्वयमेकस्मिन्नेव यागे स्वीकर्त्तव्यं भवति । तेनात्र गुणविधिरिति वक्तुं न शक्यते ।

पुनरत्र शंकामुत्थापयति – 'सोमेन यजेत' इत्यत्र विरुद्धत्रिकद्वयापत्तिं विनैव सोमशब्दस्य 'सोमवति' इति मत्वर्थे लक्षणां कृत्वा 'सोमलताविशिष्टेन यागेनेष्टं भावयेत्' इति सोमविशिष्टयागस्य विधानात् यथा सोमरूपगुणस्य विधानं भवति तथैव 'उद्भिदा यजेत' इत्यत्रापि उद्भित्पदस्य 'उद्भिद्वति' इति मत्वर्थे लक्षणां कृत्वा उद्भिद्विशिष्टस्य यागस्य विधानात् उद्भिद्गुणस्य विधानं भवितुमर्हति न वा ? अत्र समाधानञ्चेत्थं यथा – 'सोमेन यजेत' इत्यत्र विशिष्टविधानस्याङ्गीकारं विना सोमस्यान्वयं कर्त्तुमन्या गतिर्नास्ति। किन्तु 'उद्भिदा यजेत' इत्यत्र उद्भित्पदस्य योगार्थं स्वीकृत्य यागभावनायां नामधेयत्वेनान्वय:। अत्र गत्यन्तरमस्ति । तेनात्र विशिष्टविधानस्यासंभवात् उद्भिद्रूपस्य गुणस्य विधानं भवितुं नार्हति । तस्मात् 'उद्भिद्यते फलमनेन' इति व्युत्पत्त्या उद्भिदादय: शब्दा: यागस्य नामधेयानीति सिद्धम् ।

**४) वाक्यभेदशास्त्रात् –** वाक्यभेदभयादपि नामधेयत्वं स्वीक्रियते । तस्योदाहरणं यथा – 'चित्रया यजेत पशुकाम:' इति वाक्ये चित्रापदं वाक्यभेददोषभयेन प्राजापत्ययागस्य नामधेयं भवति । 'दधि मधु घृतं पयो धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यम्' इति वाक्ये 'तत्संसृष्टं प्राजापत्यम्' इत्येतानि पदानि एकाधिकरणकानि अर्थात् लिङ्ग–विभक्ति–वचनानि च समानानि सन्ति। तेन दध्यादिद्रव्यै: सह प्रजापतिदेवताया: य: सम्बन्ध: तद्धितप्रत्ययद्वारा श्रूयते, तस्माद् यागस्यानुमानं भवति । अनुमितस्य च यागस्य विधानं 'दधि मधु घृतम्' इति वाक्येन क्रियते । विहितस्य यागस्य फलाकांक्षायां सत्यां 'चित्रया यजेत' इति वाक्येन विहितयागभावनायां फलसम्बन्धस्य विधानं क्रियते । एवञ्च

'चित्रया यजेत' इति वाक्यं फलसम्बन्धविधायकं भवति । फलसम्बन्धबोधनार्थमनूदितस्य प्राजापत्ययागस्य दध्यादिचित्रविचित्रैर्द्रव्यैः साध्यत्वात् स यागः चित्रासंज्ञयोच्यते ।

अत्र शङ्कते - 'अग्नीषोमीयं पशुमालभेत' इत्यनेन वाक्येन प्राप्तं यागं 'चित्रया यजेत' इति वाक्यस्य 'यजेत' इति पदेनानूद्य तेनैव वाक्येन चित्रत्वस्त्रीत्वरूपगुणद्वयस्य विधानं कुतो न क्रियते ? प्रमाणान्तर-प्राप्तं यागोद्देश्येनानेकगुणविधाने वाक्यभेददोषः स्यात् । यथोक्तं -

'प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः' इति ।

**समाधानम्** - प्रमाणान्तरेण प्राप्तं यागमुद्दिश्यानेकगुणविधाने सति वाक्यभेददोषः प्राप्नोति । यत्र पुनः केनापि अन्येन प्रमाणेन कर्मणः प्राप्तिर्नास्ति, तादृशस्य कर्मणः अनेकगुणविशिष्टत्वेन विधानं कर्त्तुं शक्यते । तदानीं वाक्यभेदो न भवति । यथा - 'यदाऽऽग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्याञ्चाच्युतो भवति' इति वाक्येऽष्टसु कपालेषु संस्कृतपुरोडाशेन अमावास्या- पौर्णमासकालादिगुणैर्युक्तस्य तथा द्रव्यदेवतासम्बन्धेन कल्पितस्य यागस्य विधानं वाक्यभेदं विनैव भवितुमर्हति । तदुक्तम् -'अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः ।'इति ।
अर्थात् प्रमाणान्तरेणाज्ञातस्य कर्मणोऽनेकगुणविशिष्टत्वेन विधानं कर्त्तुं शक्यते ।

स्वानुशीलनप्रश्नाः
१) विरुद्धत्रिकस्य किमुदाहरणम् ?
उत्तरं- ...................................................
२) कदा अनेकगुणविधाने वाक्यभेददोषः स्यात् ?
उत्तरं- ...................................................

अत्र पुनः शङ्कामुत्थापयति - यथा 'पशुना यजेत' इत्यत्र 'अग्नीषोमीयं पशुमालभेत' इत्यनेन वाक्येन ज्ञातं यागमुद्दिश्य 'पशुना' इत्येकेन पदेन यागाङ्गत्वेन प्राप्तस्य पशुद्रव्यस्य, तल्लिङ्गस्य, पुंस्त्वस्य, तत्संख्याया एकत्वस्य चेति त्रयाणां पदार्थानां विधानं वाक्यभेदं विनैव स्वीक्रियते, तथैव 'चित्रया यजेत पशुकामः' इत्यत्र 'चित्रया' इत्येकेन पदेन प्राप्तस्य चित्रत्व - स्त्रीत्वविशिष्टस्य पशुद्रव्यरूपस्यैकस्य कारकस्य विधाने कृते सति वाक्यभेदो न भवेत् । संख्यायाः पशोर्विशेषणत्वेन विधानादेव 'पशुना यजेत' इत्यत्र विधेयस्य पशोरुपादेयत्वेन तत्र विद्यमानं यदेकत्वं तद्यागाङ्गत्वेन विवक्षितं भवति । तस्मात् 'एकेनैव पशुना यागः कर्त्तव्यः' इति निर्णीयते ।

ननु एकत्वं कदाऽविवक्षितं भवति? तदुत्तरं यथा - 'ग्रहं संमार्ष्टि' इत्यत्र ग्रहमिति पदस्य द्वितीयान्तत्वात् तदुद्देश्यमस्ति । 'यदीप्सिततमं भवति तदुद्देश्यम्' इति नियमश्रवणात् । होमस्यानुष्ठानार्थं ग्रहसंज्ञकस्य पात्रस्य 'ग्रहैर्जुहोति' इति वाक्येन

विहितत्वात् होमार्थं तत्पात्रमत्यावश्यकम् । अत एव तदीप्सिततमत्वादेव तस्य प्राधान्यम् । यतो हि 'यत् सप्रयोजनं तत्प्रधानमिति प्रसिद्धमेव । एवञ्च ग्रहस्योद्देश्यभूतत्वाद् ग्रहगतमेकत्वमविवक्षितं भवतीति सिद्धान्तः । यदा च सप्रयोजनत्वाद् ग्रहस्य प्राधान्यम्, तदा संमार्गः ग्रहं प्रति गौणः । तेन 'प्रति प्रधानं गुण आवर्त्तनीयः' इति नियममनुसृत्य 'यावन्तो ग्रहास्तेषां सर्वेषां सम्मार्जनं कर्त्तव्यमि'ति निर्णीयते । तदा 'कति ग्रहा सम्मार्जनीयाः' इति जिज्ञासाया अभावादुद्देश्यभूतो यो ग्रहः, तद्गतमेकत्वं श्रुतमपि विवक्षितं न भवति ।

तत्र पुनः शङ्कते – ननु उद्देश्यभूतस्य ग्रहस्य एकत्वं श्रुतमपि अविवक्षितं भवतीति । तथापि तत्रैकत्वमुद्देश्यगतं नास्ति, तत्तु स्वत एव विधेयमस्ति । तथाहि – 'ग्रहं संमृज्यात्', 'यं संमृज्यात् तं चैकम्' इति । अर्थात् ग्रहस्य सम्मार्जनं कर्त्तव्यम् । यस्य संमार्जनं कर्त्तुं योग्यः, स एको भवतु' इति । एवमुक्ते सति 'सम्मार्जनम्', 'एकत्वं' चेत्युभयं विधेयं भवेत् । एवञ्चोभयविधाने सति वाक्यभेदः स्यात् । वाक्यभेदमनङ्गीकृत्य उभयोर्विधानं न सम्भवति । अत उद्देश्यभूतस्य ग्रहस्य विशेषणभूता या एकत्वसंख्या सा न विवक्ष्यते । तथापि क्वचित् उद्देश्यगतस्य विशेषणस्य विवक्षाऽपि भवति। अन्यथा उद्देश्यस्य प्रतीतिरेव न भवेत् । यथा – 'ग्रहं संमार्ष्टि' इत्यत्र ग्रहविशेषणभूतस्य ग्रहत्वस्य विवक्षा क्रियते । यदि ग्रहत्वस्य विवक्षा न क्रियेत चेदुद्देश्यस्य स्वरूपमेवानवगतं स्यात् । तेन ग्रहप्रतीतिसम्पादकस्य विशेषणस्य विवक्षितत्वात् साधनभूतेन ग्रहेण साध्यभूतः सोमयागः अनुष्ठितश्चेत्तस्मादपूर्वं समुत्पद्येत । परन्तु सोमरसाधारभूतानां चमस-पात्राणां सम्मार्जनं न भवेदिति ।'पशुना यजेत' इत्यत्र यागमुद्दिश्य पशोर्विधेयत्वात् पशुः गुणभूतः अस्ति । अत्र गुणानुरोधेन प्रधानस्यावृत्तिरसङ्गता ।अतः'कियद्भिः पशुभिर्यागः कर्त्तव्यः' इत्याकाङ्क्षायां सत्यां 'पशुना' इत्येकवचनेन प्रतीयमानं यद् विधेयगतमेकत्वं, तदेव विवक्षितं भवति । यतो हि तस्यैव जिज्ञासितत्वात्।

अपरं कारणं प्रदर्शयति यत् लिङ्गेन संख्यया च विशिष्टस्य एकपदोपात्तस्य पशुद्रव्यरूपकारकस्य विधानं वाक्यभेदं विनैव कर्त्तुं शक्यते । तेन विधेयभूतस्य पशोः यागक्रियाङ्गत्वात्, तत्पशुगते लिङ्गसंख्येऽपि यागक्रियायामङ्गभूते स्तः । अत एव विधेयपशुवर्त्तिनी एकत्वसंख्याऽत्र विवक्षिता भवति । पुनः प्रकारान्तरेणापि तदेव बोधयति यत् 'पशुना' इति पदे या तृतीयाविभक्तिः, तया लिङ्गसंख्येऽभिहिते भवतः। तृतीयाविभक्त्याऽभिहिता करणकारकशक्तिः लिङ्गं संख्यां च स्वाधीने करोति । एतादृशयोर्लिङ्गसंख्ययोः प्रातिपदिकार्थभूतेन पशुद्रव्येण सह सम्बन्धो न क्रियते । अपि तु साक्षात् यागक्रियाङ्गत्वात् प्रातिपदिकार्थस्य भावनायां यथाऽन्वयो भवति, तथैव लिङ्गसंख्ययोरपि साक्षात् यागक्रियाङ्गत्वेन विधानानन्तरं 'अरुणैकहायनी' न्यायेन प्रातिपदिकार्थ-विभक्त्यर्थयोः पशुद्रव्यलिङ्गसंख्ययोश्च परस्परमन्वयो भवति । तेन 'पशुनिष्ठं, एकत्वनिष्ठं, पुंस्त्वनिष्ठं च यत् करणत्वं, तन्निरूपिका भावना' इति शाब्दबोधो भवति ।

अरुणैकहायनीन्यायस्य विवरणं प्रारभते । यथा 'अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति' इत्यत्र 'कारकाणां क्रियया सहान्वयः अवश्यं भवत्येव' इति नियमात् प्रथमतः आरुण्यस्य, पिङ्गाक्षीत्वस्य, एकहायनीत्वस्य चेत्येषां परस्परं सम्बन्धं न कृत्वा सर्वेषामेषां सोमक्रयणाङ्गत्वेन भावनायामन्वयः क्रियते । तदनन्तरमारुण्यादीनाममूर्त्ताणां गुणानां क्रयणक्रियायामनुपयोगात् क्रयणक्रियोपयोगिन्या एकहायन्या गोः करणत्वेनान्वये कृते सति तस्याः गोः आरुण्यादिगुणानां च विशेषण- विशेष्यभावेन परस्परमन्वयो भवति । तथा हि - 'या एकहायनी गौः सा पिङ्गाक्षी अरुणा च भाव्या' इति ।

अनेन विचारेणेदं स्पष्टं भवति यत् उद्देश्यगतं विशेषणमविवक्षितं भवति, विधेयगतं विशेषणं विवक्षितं भवति । तेन 'चित्रया यजेत पशुकामः' इत्यत्र चित्रापदेन 'चित्रत्व-स्त्रीत्व' इत्युभाभ्यां गुणाभ्यां सहितस्य पशुरूपस्य कारकस्य 'यजेत' इति पदेन अग्नीषोमीयपशुयागमनूद्य वाक्यभेदं विनैव विधानं कर्त्तुं शक्यते । अतः चित्रपदस्य यागनामधेयत्वं कथमिति शङ्कते ।

तत्र समाधानम् - तथा सति प्रकरणेन प्रकृतस्य फलसम्बन्धमाकांक्षमाणस्य प्राजापत्ययागस्य परित्यागः विधेयः । अप्रकृतस्य अग्नीषोमीयपशुयागस्य कल्पना क्रियेत । एतच्च द्वयमपि न युज्यते । तस्मात् चित्रापदं यागक्रियायाः नामधेयमित्येव स्वीकरणमुचितं भवेत् । एवं तत्प्रख्य- तद्व्यपदेश - यौगिक- वाक्यभेदानां मध्ये किमपि एकं निमित्तं गृहीत्वा तत्पदं कर्मनामधेयं स्वीकर्त्तव्यमिति सिद्धान्तः । अनया रीत्या एतावत्पर्यन्तं विधिवाक्यस्य प्रामाण्यं विचारितम् ।

स्वानुशीलनप्रश्नाः

१) अरुणया पिङ्गाक्ष्या गवा कस्य द्रव्यस्य क्रयणं क्रियते ?

उत्तरं- ..................................................

२) 'पशुना' इति पदेन केषां पदार्थानां बोधो भवति ?

उत्तरं- ....................................................

## सारांशः

अलौकिकयोर्धर्माधर्मयोर्विषये वेदाः प्रमाणरूपेण स्वीक्रियन्ते । यद्यपि दर्शपूर्णमासादिकर्माणि प्रत्यक्षाणि तथापि तानि कर्माणि स्वर्गादिफलस्य साधनभूतानि भवन्ति । विधिवाक्ये वर्त्तमानस्य यजेतपदस्य तप्रत्यये आख्यातत्वं लिङ्त्वञ्चेति धर्मद्वयमस्ति । आख्यातत्वधर्मः दशसु लकारेषु समान एव । आख्यातत्वधर्मेण युक्तः लिङ्प्रत्ययः पुरुषप्रवृत्तिरूपामार्थभावनां प्रतिपादयति । आर्थीभावना किं, केन, कथमिति अंशत्रयविशिष्टा । तस्मादंशत्रयात् यागेन स्वर्गं भावयेत् इत्यर्थबोधो भवति । स्वर्गश्चात्र भाव्यत्वेन निर्णीतः। शाब्दीभावनायां 'स्वर्गकामो यजेत' इत्यस्मिन् वाक्ये लिङ्प्रत्यय एव प्रेरणात्मिकां शाब्दभावनां प्रतिपादयति । अपौरुषेयत्वाद् वेदस्य

लिङादिशब्देष्वेव प्रवृत्तिजनको व्यापारस्तिष्ठति । स एव प्रेरणाख्यः व्यापारः शाब्दभावनाशब्देनोच्यते । सा शाब्दीभावना पुरुषप्रवृत्तौ कारणं भवति ।

वेदे यागानां नामानि प्रतिपादितानि सन्ति । भावनायां करणत्वेनान्वितस्य यागस्य ज्योतिष्टोम इति नामधेयमस्ति । तस्मात् ज्योतिष्टोमसंज्ञकेन यागेन स्वर्गं भावयेदित्यर्थो भवति । मीमांसाशास्त्रे तत्प्रख्य- तद्व्यपदेश- यौगिक- वाक्यभेदकारणैः चतुर्भिः नामधेयत्वं निर्णीयते । यौगिकनामधेयत्वस्वीकारे 'उद्भिदा यजेत' इत्यस्मिन् वाक्ये गुणत्वस्वीकारे यागनामत्वस्वीकारे च विरुद्धत्रिकद्वयमुपस्थितं भवति । प्रथमं त्रिकं विधेयत्वं, गुणत्वमुपादेयत्वं चेति ।द्वितीयं त्रिकं यागस्य प्राधान्यमुद्देश्यत्वमनुवाद्यत्वं चेति स्वीकर्त्तव्यं भवति।

## पारिभाषिकशब्दाः

१) अष्टाकपालः – अष्टसु कपालेषु संस्कृतः पुरोडाशः ।

२) व्यपदेशः – उपमानद्वारा यत्र प्रकृतविषयो वर्ण्यते, स व्यपदेशपदेनोच्यते ।

३) स्वाध्यायः – स्वाध्यायो नाम स्वकुलपरम्पराप्राप्ता वेदशाखा ।

४) भावना – उत्पद्यमानस्य पदार्थस्योत्पत्तौ साधनीभूतः प्रयोजकव्यापारो भावना इत्युच्यते ।

५) तत्प्रख्यं – तत्प्रख्यं नाम देवतारूपगुणस्य प्रकाशकं शास्त्रान्तरम् ।

## आदर्शप्रश्नाः

### क. निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः)

१) आर्थीभावनां निरूपयत ।

२) शाब्दीभावनां विचारयत ।

३) नामधेयानां कारणानि विलिख्य तत्प्रख्यशास्त्रान्नामधेयत्वं विशदयत ।

### ख. विश्लेषणात्मकप्रश्नाः (प्रत्येकं १५/१० अङ्काः)

१) वेदस्यालौकिकार्थं बोधयत ।

२) शाब्दीभावनायाः अंशत्रयं विशदयत ।

३) आर्थीभावनायाः अंशत्रयं विवेचयत ।

४) वाक्यभेदशास्त्रात् नामधेयत्वं कथं स्वीक्रियते ?

५) विरुद्धत्रिकविचारमुपस्थापयत ।

### ग. लघुप्रश्नाः (प्रत्येकं ५ अङ्काः)

१) विधिवाक्यस्य विधायकत्वं विचारयत ।

२) नामधेयः कथं स्वीक्रियते ?

३) यौगिकशास्त्रात् नामधेयस्वीकारे कः दोषः ?

४) अरुणैकहायनीन्यायं विवृणुत ।

५) तत्प्रख्यन्यायस्योदाहरणं विशदयत ।

६) 'ओदनकामः पचेदि'ति विधिवाक्ये अंशत्रयं विचारयत ।

७) लोकव्यवहारे प्रेरणाज्ञानं कथं लभ्यते ?

८) भावनायाः किं लक्षणम् ?

**घ. एकाङ्कप्रश्नाः (प्रत्येकमेकाङ्कः)**

१) यजेतपदस्य तत्प्रत्यये कीदृशं धर्मद्वयमस्ति ?

२) आर्थीभावनायाः अंशत्रयं किम् ?

३) आर्थीभावनायां साधनाकाङ्क्षायां कोऽन्वेति ?

४) अग्निहोत्रपदं केन समासेन होमनामधेयं स्वीक्रियते ?

५) शाब्दभावनायां साध्याकाङ्क्षायां कस्यान्वयो भवति ?

६) मीमांसाशास्त्रे कस्य विधेयत्वं स्वीक्रियते ?

७) पुरुषप्रवृत्तिं प्रति हेतुभूतव्यापारः केन शब्देनोच्यते ?

८) वेदाः किं बोधयन्ति ?

९) चित्रया इति पदेन कीदृशं गुणद्वयं जायते ?

१०) अरुणयैकहायन्या गवा कीदृशं द्रव्यं क्रीणाति ?

**एकाङ्कस्योत्तराणि –**

१) आख्यातत्वं, लिङ्त्वं चेति,

२) किं,केन,कथमिति,

३) स्वर्गः,

४) बहुव्रीहिसमासेन,

५) पुरुषप्रवृत्तिरूपायाः आर्थभावनायाः,

६) भावनायाः,

७) प्रवर्त्तनाशब्देन,

८) धर्मं,

९) चित्रत्वं स्त्रीत्वं च,

१०) सोमं ।

*******

# चतुर्थखण्डः – अर्थवादविचारादारभ्य वेदस्य प्रामाण्यविचारपर्यन्तम्

संरचना


४.१. प्रस्तावना

४.२. उद्देश्यम्

४.३. अर्थवादप्रामाण्यविचारः

४.३.१. अर्थवादस्य प्रामाण्यम्

४.३.२. अर्थवादभेदाः –

४.४. मन्त्रविचारः

४.५. परिसंख्यायां दोषत्रयम्

४.६. विकल्पे दोषाष्टकम्

४.७. वेदस्य प्रामाण्यविचारः


## ४.१. प्रस्तावना

मीमांसापरिभाषायाः अस्मिन् पाठ्यांशे अर्थवादविचारादेव विषयः प्रारभ्यते । तत्र अर्थवादस्य प्रामाण्यविचारः, अर्थवादभेदाः, तेषामुदाहरणानि प्रतिपादितानि भवेयुः । तदनु मन्त्रविचारः, मन्त्रप्रयोजनं, परिसंख्यायाः दोषत्रयं, विकल्पे दोषाष्टकं, वेदस्य प्रामाण्यविचारश्च प्रतिपादिताः स्युः । वेदस्य पञ्चधा विभागे विधिनिरूपणानन्तरमर्थवादस्य प्रसङ्ग आगच्छति । स चार्थवादः वेदबोधितविधिवाक्यानां प्राशस्त्यजननद्वारा प्रामाण्यं भवतीति उच्यते ।

## ४.२. उद्देश्यम्

अस्मिन् पाठ्यांशे निम्नोक्ताः ध्यानबिन्दवो भवन्ति ।

- अर्थवादविचारविषये भवन्तः ज्ञातुं पारयेयुः ।
- मन्त्रप्रयोजनञ्च भवद्भिः ज्ञातुं शक्येत ।
- परिसंख्यायाः त्रयाणां दोषाणां विचारोऽत्र प्रवर्त्तेत । स च विचारः भवद्भिः ज्ञायेत।
- विकल्पे जातानामष्टदोषाणां विषये भवतां ज्ञानं भवेत् ।
- वेदप्रामाण्यविषये भवन्तः ज्ञातुं शक्नुयुः ।

## ४.३. अर्थवादप्रामाण्यविचारः

### ४.३.१. अर्थवादस्य प्रामाण्यम्

इदानीमर्थवादवाक्यानि अधिकृत्य विचारः क्रियते । यदि अर्थवादवाक्यानि स्वार्थप्रतिपादकानि अङ्गीक्रियन्ते तदा तानि प्रयोजनरहितानि भवेयुः । परन्तु स्वाध्यायाध्ययनावसरे अर्थवादवाक्यान्यपि पठ्यन्ते। तेनार्थवादवाक्येभ्यः जातस्यार्थज्ञानस्य प्रयोजनविशिष्टता स्वीक्रियते । अतः अर्थवादवाक्यानि विधिविहितस्य विधेयपदार्थस्य प्राशस्त्यं प्रतिपाद्य विधिवाक्यैः सहैकवाक्यतां लभन्ते । तेन विधिवाक्यैकवाक्यतावशाद-र्थवादवाक्यान्यपि प्रमाणानि भवन्ति ।

### ४.३.२. अर्थवादभेदाः -

अर्थवादवाक्यानि चतुर्विधानि भवन्ति । यथा - १) निन्दार्थवादः, २) प्रशंसार्थवादः, ३) परकृत्यर्थवादः, ४) पुराकल्पार्थवादश्च । अर्थात् निन्दा - प्रशंसा - परकृति - पुराकल्पभेदात् अर्थवादः चतुर्विधो भवति ।

**१) निन्दार्थवादः –** तत्र निन्दार्थवादो यथा - 'असत्रं वा एतद् यदच्छन्दोमम्', 'अश्रुजं हि रजतं यो बर्हिषि ददाति पुराऽस्य संवत्सराद् गृहे रुदन्ति' इत्यादिः ।

**२) प्रशंसार्थवादः –** तत्र प्रशंसार्थवादस्य उदाहरणं यथा - 'शोभतेऽस्य मुखं य एवं वेद', 'वायुर्वै क्षेपिष्ठा देवता', 'वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति' इत्येवमादीनि ।

**३) परकृत्यर्थवादः –** 'परेण केनचित् महता पुरुषेणेदं कर्म अनुष्ठितमि'त्यर्थप्रतिपादकं वाक्यं परकृतिसंज्ञकोऽर्थवादः । उदाहरणं यथा -'अग्निर्वा अकामयत' इत्यादिः ।

**४) पुराकल्पार्थवादः –** परेण केनचिदुक्तस्यार्थस्य प्रतिपादकमथवा पूर्वघटितस्य वृत्तान्तस्य प्रतिपादकं वाक्यं पुराकल्पसंज्ञकोऽर्थवादः । तस्योदाहरणं यथा - 'तमशपद्धिया धिया त्वा वध्यासुः' इत्यादि ।

स्वानुशीलनप्रश्नाः
१) अर्थवादवाक्यानां कथं प्रामाण्यं स्वीक्रियते ?
उत्तरं- ........................................
२) अर्थवादः कतिविधः ?
उत्तरं- ...........................................
३) पुराकल्पार्थवादस्य किमुदाहरणम् ?
उत्तरं- ...............................................

## उदाहरणानां समन्वय:

एतेष्वर्थवादेषु इदं निन्दार्थवादवाक्यं विधेयपदार्थात् कस्यचिद् भिन्नस्य पदार्थस्य निन्दां कृत्वा विधेयपदार्थस्य प्रशंसां करोति । यथा – 'अश्रुजं हि रजतम्' इत्यत्र रजतस्य निन्दाद्वारा विधेयभूतस्य रजतदाननिषेधस्य प्राशस्त्यं प्रकाश्यते । अत्र एकस्यैव पदार्थस्य निन्दाप्रशंसे नावगम्येते । तेन न कोऽपि विरोध: । एतदतिरिक्तानि अवशिष्टानि त्रीण्यर्थवादवाक्यानि विधेयपदार्थस्य प्रशंसां साक्षात् कुर्वन्ति । 'वायुर्वै क्षेपिष्ठा देवता' इत्यत्र वायुदेवता शीघ्रगामित्वादतीव प्रशस्ता । तस्माद् वायुदेवताकं कर्म प्रशस्तं भवति। अनेन प्रकारेण विधेयकर्माङ्गभूतदेवताया: प्राशस्त्यप्रतिपादनद्वारा विधिवाक्येन सहास्यार्थवादवाक्यस्य एकवाक्यता निष्पद्यते ।

'अग्निर्वा अकायमत' इत्ययमर्थवाद: परकृतिसंज्ञक: । अग्निदेवताकस्य यागस्यानुष्ठानं पूर्वस्मिन् कालेऽग्निनैव स्वयं कृतमित्यत: स याग: प्रशस्तोऽस्ति । अत: साम्प्रतमपि यजमानेन सोऽवश्यमनुष्ठेय: । अत्र विधेयकर्मगतं प्राशस्त्यं प्रतिपाद्य अयं परकृत्यर्थवादो विधिवाक्येन सह एकवाक्यतां प्राप्नोति । एवमेव यस्य विधे: सन्निधौ योऽर्थवादो भवेत् तस्य विधेयकर्मप्राशस्त्यद्वारा विध्येकवाक्यत्वं विज्ञेयम् ।

क्वचित् प्राशस्त्यप्रतिपादनं विना अर्थवादस्य कार्यान्तरमपि विद्यते । यथा – 'अक्ता: शर्करा उपदधाति' इति । अत्र विधौ 'अक्ता:' पदेन सामान्यतया द्रवद्रव्यस्य बोधो भवति । तच्च द्रवद्रव्यं किमिति संशये सति तद्विधिसमीपे पठितेन 'तेजो वै घृतम्' इत्यर्थवादेन तद् द्रवद्रव्यं घृतमिति निश्चीयते । अत: 'तेजो वै घृतम्' इति घृतप्रशंसाबोधकस्यार्थवादस्य सन्दिग्धार्थनिर्णायकत्वेनापि प्रामाण्यं विज्ञायते ।

## ४.४. मन्त्रविचार:

'स्वाध्यायोऽध्येतव्य:' इत्यध्ययनविधि: 'समस्त: स्वाध्याय: प्रयोजनवदर्थज्ञानयुक्त:' इति बोधयति । तेन स्वाध्यायान्तर्गता मन्त्रा अपि प्रयोजनवदर्थज्ञानार्था एव । नादृष्टार्था: । यतो हि दृष्टं फलं यदि सम्भवति, तदाऽदृष्टफलं न कल्पनीयम् । अदृष्टफलकल्पनमनुचितम् । किञ्चानुष्ठानसमये कर्मण: स्वरूपज्ञानं विना कर्मणोऽनुष्ठानमेव न सम्भवेत् । तेन स्पष्टमेतद् भवति यत् कर्मानुष्ठानमुपकारकं यदर्थज्ञानं, तन्मन्त्रैरेव भवति ।

अत्र शङ्कामुत्थापयति – कस्यचिदुपदेशकस्य वचनेनापि कर्मोपयोगिन: पदार्थस्मरणस्य सम्भवेन तदनुष्ठानं सम्भवेत् । तत्र समाधानं यत् अनुष्ठानोपयोगिनं पदार्थं मन्त्रैरेव स्मृत्वा कर्मानुष्ठाने कृते सति तस्मात् फलं सम्भवति, अन्यथा न सम्भवतीति नियम: । अस्य नियमस्य विद्यमानत्वादेवादृष्टोत्पत्ति: स्वीक्रियते । नियमस्यास्य अभावे नियमादृष्टस्यापि लोपो भवेत् । ततश्च नियमादृष्टमूलकं प्रधानयागजन्यं परमापूर्वमपि नोत्पद्येतेति मीमांसकै: कल्पितम् ।

पुनरत्र शङ्कते – अनेन प्रकारेण स्वप्रकाश्येऽर्थे मन्त्राणां विनियोगो भवतीति फलितम् । एवञ्च मन्त्रै: प्रकाश्यमानेऽर्थे एव तेषां मन्त्राणां विनियोगो वाच्य: । विनियोगो

नाम शेषत्वेनान्वयः । शेषत्वं नामाङ्गत्वम् । ततश्च 'इमामगृभ्णन् रशनामृतस्य' इति मन्त्रे रशनाग्रहणात्मकस्यार्थस्य प्रकाशनसामर्थ्यमस्ति। तस्मात् तत्सामर्थ्यात्मकेन लिङ्गप्रमाणेनायं मन्त्रः रशनाग्रहणस्याङ्गं भवितुं शक्नोति । तर्हि 'इत्यश्वाभिधानीमादत्ते' इति ब्राह्मणवचनं किमर्थं प्रतिपाद्यते ? तत्रोत्तरं दीयते - परिसंख्यार्थत्वात् । तद् ब्राह्मणवचनं निरर्थकं नास्ति । तद्वचनं परिसंख्यार्थमस्ति । नहि तत् मन्त्रविनियोगकरणार्थम् । इयं परिसंख्या यथा- चयनयागप्रकरणे तावत् 'अश्वरशनाग्रहणम्, गर्दभरशनाग्रहणम्' चेति द्विविधं रशनाग्रहणमस्ति । तत्र लिङ्गप्रमाणेन यथा अश्वरशनाग्रहणेनायं मन्त्रो वक्तव्य इति प्रतिभाति । तथैव लिङ्गप्रमाणेन कस्यापि विशेषस्याप्रदर्शितत्वात् अयं मन्त्रः गर्दभरशनाग्रहणेऽपि वक्तुं शक्यः । एवं चोभयरशनाग्रहणे मन्त्रोऽयं प्राप्नोति। तदा 'अश्वरशनाग्रहणेऽयं मन्त्रः वक्तव्यः, न तु गर्दभरशनाग्रहणे' इति मन्त्रस्यान्यनिवृत्तिरूपपरिसंख्यार्थं 'इत्यश्वाभिधानीमादत्ते' इत्ययं विधिः युज्यते ।

## ४.५. परिसंख्यायां दोषत्रयम्

परिसंख्याविधिस्वीकारे त्रयो दोषाः भवन्ति । ते च दोषाः यथा -
१) स्वार्थत्यागः, २) परार्थस्वीकारः, ३) प्राप्तबाधश्चेति । तथा चोक्तं -

'श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात् ।
प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदूषणा ।।'इति।

तत्र 'इत्यश्वाभिधानीमादत्ते' इति । अस्य ब्राह्मणवाक्यस्यायमर्थः यदनेन मन्त्रेणाश्वरशनाया ग्रहणं कर्त्तव्यम्। परिसंख्यायां सत्यामस्यार्थस्य परित्यागः क्रियेत । 'अनेन मन्त्रेण गर्दभरशनाया ग्रहणं न कर्त्तव्यम्' इत्यश्रुतार्थस्य स्वीकारः क्रियेत । गर्दभरशनाग्रहणेऽपि लिङ्गप्रमाणेन प्राप्तस्य मन्त्रस्य 'इत्यश्वाभिधानीमादत्ते' इति ब्राह्मणवाक्येन बाधः स्वीक्रियेत । इत्थं त्रिदोषयुक्ता परिसंख्या उपायान्तरासत्त्वात् अगत्या स्वीक्रियते। उपायान्तरे सति परिसंख्यायाः स्वीकरणं न कर्त्तव्यम् ।

अगतिकत्वाद्यदि परिसंख्या स्वीकर्त्तव्या भवति, तर्हि उपायान्तरस्याविद्यमानत्वादष्टदोषदुष्टः विकल्पोऽपि स्वीक्रियेत । उदाहरणं यथा - 'यदाग्नेयोऽष्टाकपालः' इति विधिवाक्येन अष्टसु कपालेषु प्रस्तुतः पुरोडाशः यागाङ्गत्वेन विहितोऽस्ति । तत्रापूपरूपस्य पुरोडाशविशेषस्य प्रकृतिद्रव्यं किमिति आकांक्षायां सत्यां विधिवाक्ये कस्यापि द्रव्यस्याप्राप्तत्वात् 'येन केनापि द्रव्येण पुरोडाशः कर्त्तव्यः' इति प्राप्तौ पुरोडाशप्रकरणे पठितं 'व्रीहिभिर्यजेत' इति वाक्यमनुसृत्य पुरोडाशार्थं प्रकृतिद्रव्यरूपेण व्रीहिद्रव्यस्य नियमनं भवति । पुरोडाशनिर्माणनिमित्तं व्रीहियवयोर्द्वयोः प्रकृतिद्रव्ययोरुपयोगः कर्त्तुं शक्येत । किन्तु द्वयोरुपयोगः एकस्मिन्नेव काले कर्त्तुं न शक्येत । अतोऽगत्या विकल्पः स्वीकर्त्तव्यो भवति । 'व्रीहिभिः पुरोडाशः कर्त्तव्यः, अथवा यवैः पुरोडाशः कर्त्तव्यः' इति विकल्पस्य स्वरूपम् । अस्मिन् विकल्पोदाहरणे द्रव्ययोर्विकल्पः प्रदर्शितः ।

विकल्पस्यापरमुदाहरणं प्रदर्शयितुं प्रारभते । यथा – 'अतिरात्रे षोडशिनं गृह्णाति' इति अतिरात्रयागे षोडशिग्रहस्य ग्रहणं विधीयते । तथैव 'नातिरात्रे षोडशिनं गृह्णाति' इति वाक्येनातिरात्रसंज्ञके यागे षोडशिग्रहस्य ग्रहणं न कर्त्तव्यमिति निषिध्यते । अत्र एकेन वाक्येन षोडशिग्रहणं कर्त्तव्यमित्युक्तम्। अपरेण वाक्येन षोडशिग्रहस्य ग्रहणं न कर्त्तव्यमित्युक्तम् । ग्रहणाग्रहणे परस्परं विरुद्धत्वात् न युगपदनुष्ठातुं शक्येते । अतः कुत्रचित् प्रयोगे षोडशिग्रहस्य ग्रहणं कर्त्तव्यम् । प्रयोगान्तरे च षोडशिग्रहपात्रस्य ग्रहणं न कर्त्तव्यम् इति विकल्पोऽगत्या स्वीक्रियते । अत्र षोडशिग्रहग्रहण– तदभावयोर्विकल्पः प्रदर्शितः ।

स्वानुशीलनप्रश्नाः
१) स्वार्थत्यागः नाम किम् ?
उत्तरं– ..............................................
२) षोडशिग्रहणं कस्मिन् यागे भवति ?
उत्तरं– ....................................................
३) मन्त्राणां कथं प्रामाण्यम् ?
उत्तरं– ..................................................

## ४.६. विकल्पे दोषाष्टकम्

अत्र विकल्पे अष्टौ दोषाः जायन्ते । ते चाष्टदोषाः यथा –

१) पुरोडाशार्थं व्रीहीणामङ्गीकारे 'यवैर्यजेत' इति यवविधायकशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणप्रामाण्यस्य परित्यागः क्रियते । विधेयार्थस्यानुष्ठापकत्वेनैव विधीनां प्रामाण्यं भवति।अन्यथा विधीनां न प्रामाण्यम् । यदा विधिवाक्यार्थो नानुष्ठीयते, तदा विधेः प्रामाण्यस्य परित्यागो भवति । तस्य चाप्रामाण्यं स्वीकृतमिव भवति ।

२) अननुष्ठापकत्वलक्षणाप्रामाण्यस्वीकारः अर्थात् यवशास्त्रमप्रमाणमिति स्वीक्रियते ।

३) पक्षान्तरे यवपक्षे पुरोडाशार्थं यवानां स्वीकारे यवशास्त्रस्य पूर्वं परित्यक्तं यत् प्रामाण्यं तत् स्वीकृतमिव भवति । अर्थात् परित्यक्तस्य प्रामाण्यस्य स्वीकारः कृतः ।

४) पूर्वं व्रीहिप्रयोगे यवशास्त्रस्य स्वीकृतं यदप्रामाण्यं तदिदानीं न स्वीक्रियते इति वक्तव्यं भवति । एते चत्वारो दोषाः यवशास्त्रस्वीकारपक्षे जायन्ते ।

५) पूर्वं पुरोडाशार्थं यवानां स्वीकारे 'व्रीहिभिर्यजेत' इति व्रीहिशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणं यत् प्रामाण्यं तस्य परित्यागः स्यात् ।

६) तस्य च अननुष्ठापकत्वलक्षणं यदप्रामाण्यं तत् स्वीकृतमिव भवति । अर्थात् व्रीहिशास्त्रमप्रमाणमिति स्वीक्रियेत ।

७) पुनर्द्वितीयप्रयोगे पुरोडाशार्थं व्रीहिशास्त्रस्य स्वीकारे तस्य परित्यक्तप्रामाण्यस्य अर्थात् अप्रामाण्यस्य स्वीकारः स्यात् ।

८) स्वीकृतस्याप्रामाण्यस्य पुनः परित्यागः क्रियेत। इत्थं व्रीहिशास्त्रसम्बद्धाश्चत्वारो दोषाः भवन्ति । अत्रैव यवशास्त्रसम्बद्धानां चतुर्णां दोषाणां समावेशे कृतेऽष्टौ दोषाः भवन्ति। इत्यष्टदोषदुष्टो विकल्पो भवति ।

होमानुष्ठानकाले यवशास्त्रानभ्युपगमे व्रीहिशास्त्रस्य यदा स्वीकारः क्रियते तदा यवशास्त्रे दोषद्वयम् । एवं व्रीहिशास्त्रानभ्युपगमे यवशास्त्रस्य यदा स्वीकारः क्रियते तदा व्रीहिशास्त्रे दोषद्वयमिति मिलित्वा चत्वारो दोषाः भवन्ति । तथैव व्रीहिद्रव्यस्य होमानुष्ठाने उपयोगानुपयोगयोश्चत्वारो दोषाः भवन्ति । व्रीहियवयोर्वैकल्पिकत्वात् उभयोर्मिलित्वाऽष्टौ दोषाः भवन्ति ।इति ।स च क्वचित् एककार्यकारित्वादेव विकल्पो भवति । यथा - व्रीहियवयोः प्रत्येकस्य पुरोडाशनिष्पादनात्मकमेकं कार्यं कर्तुं क्षमता विद्यते । अतः व्रीहियवयोरेकार्थत्वाद् विकल्पः स्वीक्रियते ।

कुत्रचिद् स्वतन्त्रवचनबलाद् विकल्पो भवति । उदाहरणं यथा - 'बृहत्पृष्ठं भवति' इति वाक्येन बृहत्संज्ञकसाम्ना साध्यं पृष्ठसंज्ञकं स्तोत्रं विधीयते । तथैव 'रथन्तरं पृष्ठं भवति' इति वाक्येन रथन्तरसंज्ञकनाम्ना साध्यमपरं पृष्ठसंज्ञकं स्तोत्रं विधीयते ।

स्तोत्रं तावत् अपूर्वार्थत्वात् प्रयाजादिवत् अर्थकर्म भवति । किन्तु साम्नः संस्कारकर्मत्वाद् गुणकर्मत्वं भवति । साम्ना खलु स्तोत्रगताक्षराणां स्पष्टतारूपः संस्कारः क्रियते । तेन सामानि स्तोत्रसाधनानि। प्रगीतमन्त्रसाध्या इन्द्रादिदेवतानां या स्तुतिः सा स्तोत्रमित्युच्यते । प्रगीतमन्त्रसाध्यत्वं च साम्ना प्रतिपादित-ऋगक्षरसाध्यम् । अप्रगीतमन्त्रसाध्यं गुणिनिष्ठगुणाभिधानं शस्त्रम् । गानक्रियाविशेषो हि साम इत्युच्यते । स्तोत्रं वक्तुमुपयुज्यमाना ऋचः स्तोत्रीयाः इत्युच्यन्ते। तासां स्तोत्रीयाख्यानामृचा त्रिवृत् - पञ्चदशेत्यादिसंख्याविशेषः स्तोमशब्देनोच्यते । इत्थमुक्तानां पदार्थानां भेदः प्रतिपादितः। तथा च बृहत्पृष्ठस्तोत्रजन्यमपूर्वं भिन्नम्, रथन्तरपृष्ठस्तोत्रजन्यं चापूर्वं भिन्नम् । तेन तयोः स्तोत्रयोरेकार्थत्वाभावेऽपि 'बृहत्पृष्ठं कर्त्तव्यम्' अथवा 'रथन्तरपृष्ठं कर्त्तव्यम्' इति वचनबलादेवात्र विकल्पः स्वीक्रियते ।

क्वचित् स्थलेषु व्यवस्थितविकल्पो भवति । यथा पञ्चप्रयाजानां मध्ये द्वितीयप्रयाजकर्मानुष्ठान-काले 'नाराशंस - तनूनपात्' इत्यनयोर्मन्त्रयोरेकप्रयोजनत्वाद् विकल्पः स्वीक्रियते, किन्तु वसिष्ठगोत्रोत्पन्नेन, कण्वगोत्रोत्पन्नेन च क्षत्रिययजमानेन नाराशंसपदेन युक्तो द्वितीयः प्रयाजोऽनुष्ठेयः, तद्भिन्नगोत्रोत्पन्नैर्यजमानैः 'तनूनपात्' पदेन युक्तो द्वितीयः प्रयाजोऽनुष्ठेय इति वाक्यादस्मात् प्रतीयते। तस्मादत्र व्यवस्थितविकल्पो भवति ।

स्वानुशीलनप्रश्नाः
१) पुरोडाशनिर्माणनिमित्तं कयो: प्रकृतिद्रव्ययोरुपयोगो भवति ?
उत्तरं- ..............................................
२) यवशास्त्रानभ्युपगमे व्रीहिशास्त्रस्य स्वीकारे कति दोषा: संभवन्ति ?
उत्तरं- ................................................
३) व्रीहिशास्त्रसम्बन्धिन: कति दोषा: भवन्ति ?
उत्तरं- ................................................

## ४.७. वेदस्य प्रामाण्यविचार:

तदेवं चोदनेत्यपरसंज्ञकानां विधिवाक्यानां किं, केन, कथमिति अंशत्रयविशिष्टार्थभावना-विधायकत्वात् प्रामाण्यम् । उद्भिदादिवाक्यानां कर्मनामधेयप्रतिपादकत्वात् प्रामाण्यम् । अर्थवादवाक्यानां विधेयार्थस्य प्राशस्त्यप्रतिपादकत्वात् प्रामाण्यम् । मन्त्रवाक्यानाञ्चानुष्ठानकालिकपदार्थस्मारकत्वात् प्रामाण्यम्। अनेन प्रकारेण समग्र: वेद: अलौकिके धर्माधर्मरूपे विषये प्रमाणमिति सर्वेषु आर्षग्रन्थेषु प्रतिपादितम् । एवञ्च विधि - नामधेय - अर्थवाद - मन्त्ररूपै: चतुर्धाविभक्तस्य वेदस्य तत्र प्रत्येकस्य प्रामाण्यं व्यवस्थापितमिति ।

स्वानुशीलनप्रश्नाः
१) स्तोमशब्देन किं ज्ञायते ?
उत्तरं- ..................................................
२) शस्त्रस्य किं स्वरूपम् ?
उत्तरं- ................................................
३) चोदनाया: पर्यायवाचक: शब्द: क: ?
उत्तरं- ...............................................

## सारांश:

अस्मिन् पाठ्यांशे प्रतिपादितविषयाणां सारांश: प्रतिपाद्यते । अर्थवादवाक्यानि स्वार्थप्रतिपादकानि न भवन्ति । अर्थवादवाक्यानि विधेयपदार्थस्य प्राशस्त्यं प्रतिपाद्य विधिवाक्यै: सहैकवाक्यतां लभन्ते । तेन विधिवाक्यैकवाक्यतावशादर्थवादवाक्यान्यपि प्रमाणानि भवन्ति । अर्थवाद: निन्दा - प्रशंसा - परकृति - पुराकल्पभेदै: चतुर्विधो भवति । मन्त्रविचारे मन्त्राणां प्रयोजनवत्वं प्रतिपादितम्। स्वप्रकाश्यमाने विषये एव मन्त्राणां विनियोगो भवति । परिसंख्याविधिस्वीकारे दोषत्रयमुत्पद्यते । ते च दोषा: भवन्ति यथा - १) स्वार्थत्याग:, २) परार्थस्वीकार:, ३) प्राप्तबाधश्चेति । अगतिकत्वाद्

परिसख्याविधिस्वीकारे उपायान्तरस्याविद्यमानत्वात् अष्टदोषदुष्टः विकल्पः स्वीक्रियेत । स च विकल्पः व्रीहि - यवशास्त्रयोर्मध्ये स्वीक्रियते । व्रीहियवयोः वैकल्पिकत्वादुभयोर्मिलित्वाऽष्टौ दोषाः भवन्ति । वेदस्य प्रामाण्यविचारे विधि - नामधेय - अर्थवाद - मन्त्ररूपस्य समग्रस्य वेदस्य प्रामाण्यं व्यवस्थापितम् । विधिवाक्यानामार्थभावनाविधायकत्वात्, उद्भिदादिवाक्यानां कर्मनामधेयप्रतिपादकत्वात्, अर्थवादवाक्यानां विधेयार्थस्य प्राशस्त्यप्रतिपादनात्, मन्त्राणाञ्चानुष्ठानकालिकपदार्थस्मारकत्वात् प्रामाण्यं स्वीक्रियते ।

## पारिभाषिकशब्दाः

१) विनियोगः - शेषत्वेन अन्वयः ।

२) स्तोत्रम् - प्रगीतमन्त्रसाध्या इन्द्रादिदेवानां या स्तुतिः सा स्तोत्रम् ।

३) अतिरात्रः - सप्तसोमयज्ञेषु अन्यतमः प्रयोगविशेषः ।

४) शस्त्रम् - अप्रगीतमन्त्रसाध्यं गुणिनिष्ठगुणाभिधानं शस्त्रम् ।

५) क्षेपिष्ठा - शीघ्रगामी ।

६) षोडशीग्रहः - यज्ञीयपात्रविशेषः ।

## आदर्शप्रश्नाः

### क. निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः)

१) अर्थवादवाक्यानां प्रामाण्यं सोदाहरणं प्रतिपादयत ।

२) परिसंख्याविधेः दोषत्रयमालोचयत ।

३) विकल्पस्वीकारे जातानामष्टदोषाणां विवेचनं कुरुत ।

### ख. विश्लेषणात्मकप्रश्नाः (प्रत्येकं १५/१० अङ्काः)

१) मन्त्रविचारमुपस्थापयत ।

२) विकल्पे व्रीहिशास्त्रसम्बन्धि दोषचतुष्टयं विशदयत ।

३) विकल्पे यवशास्त्रसम्बन्धि दोषचतुष्टयं विचारयत ।

४) परिसंख्याविधेः त्रयाणां दोषाणां विचारमुपस्थापयत ।

### ग. लघुप्रश्नाः (प्रत्येकं ५ अङ्काः)

१) वेदस्य प्रामाण्यं विचारयत ।

२) षोडशिग्रहणाग्रहणवाक्यमालोचयत ।

३) अर्थवादानां प्रामाण्यं कथं स्वीक्रियते ?

४) अर्थवादभेदान् प्रतिपादयत ।

५) मन्त्रस्य प्रयोजनक्त्वं साधयत ।

६) परिसंख्याविधेः त्रयाणां दोषाणां नामानि कथयत ।

७) स्वतन्त्रवचनबलाद् विकल्पः कथं स्वीक्रियते ?

**घ. एकाङ्कप्रश्नाः (प्रत्येकमेकाङ्कः)**

१) अर्थवादः कतिविधः ?

२) रशनाग्रहणप्रसङ्गः कस्मिन् प्रकरणे कथितोऽस्ति ?

३) गर्दभरशनाग्रहणात् प्राक् कस्य पशोः रशना ग्रहणीया ?

४) अर्थवादवाक्यानां कथं प्रामाण्यम् ?

५) प्रशंसार्थवादस्य किमुदाहरणम् ?

६) कर्मनामधेयप्रतिपादकत्वात् केषां प्रामाण्यम् ?

७) अनुष्ठानकालिकपदार्थस्मारकत्वात् केषां प्रामाण्यम् ?

८) स्तोत्रशब्दस्य किं स्वरूपम् ?

९) प्रयाजाः कतिसंख्यकाः ?

१०) विकल्पे कति दोषाः सम्भवन्ति ?

**एकाङ्कस्योत्तराणि –**

१) चतुर्विधः,

२) चयनयागप्रकरणे,

३) अश्वस्य,

४) विधेयार्थप्राशस्त्यप्रतिपादनेन,

५) शोभतेऽस्य मुखं य एवं वेद,

६) उद्भिदादिवाक्यानां,

७) मन्त्राणाम्,

८) प्रगीतमन्त्रसाध्या इन्द्रादिदेवतानां या स्तुतिः सा स्तोत्रम्,

९) पञ्चसंख्यकाः,

१०) अष्टौ ।

*******

# पञ्चमखण्डः –स्मृत्यादिप्रामाण्यविचारादारभ्य ग्रन्थान्तं यावत्

संरचना

५.१. प्रस्तावना
५.२. उद्देश्यम्
५.३. स्मृत्यादिप्रामाण्यविचारः
५.४. कर्मभेदनिरूपणम्
५.५. प्रमेयादिविचारः
५.६. क्रमविचारः

## ५.१. प्रस्तावना

मीमांसापरिभाषायाः अस्मिन् पाठ्यांशे आदौ मन्वादिप्रणीतानां स्मृतिग्रन्थाणां प्रामाण्यं विचार्यते। तदनन्तरं शिष्टाचारस्य धर्मे प्रामाण्यं प्रतिपादितम् । तत्र शिष्टाचारोऽपि स्मृतिद्वारा श्रुतिमूलकत्वेन प्रमाणं भवेत् । तदनन्तरं कर्मभेदः निरूप्यते । पूर्वोक्तेषु पाठ्यांशेषु धर्माधर्मयोर्प्रामाण्यं निरूपितम् । इदानीं धर्मभेदकप्रमाणानां निरूपणार्थमुपक्रमः क्रियते । षड्धर्मभेदकप्रमाणानां विवेचनमत्र क्रियेत । ततः प्रमेयादिविचारः प्रतिपाद्येत । त्रिविधानां प्रमेयार्थानां प्रतिपादनं सोदाहरणमत्र भवेत्। ग्रन्थस्यान्तिमे प्रधानाङ्गकर्मणां क्रमः प्रयोजनानुसारं निरूप्यते ।

## ५.२. उद्देश्यम्

अस्मिन् पाठ्यांशे प्रमुखाः ध्यानबिन्दवो भवन्ति । यथा –

- स्मृतिग्रन्थाणां प्रामाण्यविषये भवन्तः ज्ञातुं शक्नुयुः ।
- शिष्टाचारस्य धर्मप्रमाणविषयेऽपि भवन्तः जानीयुः ।
- कर्मणां भेदविषये भवतां ज्ञानं भवेत् ।
- प्रमेयार्थानां विचारविषये भवद्भिः ज्ञातं स्यात् ।
- प्रधानाङ्गकर्मणां क्रमविषये भवन्तः ज्ञातुं पारयेयुः ।

## ५.३. स्मृत्यादिप्रामाण्यविचारः

वेदमनुसृत्य मन्वादिभिर्विरचितानां स्मृतिग्रन्थानामपि वेदमूलकत्वात् प्रामाण्यं स्वीक्रियते । अर्थात् वेदतुल्यमेव स्मृतीनां प्रामाण्यं वर्त्तते । अतः अष्टकादिकर्मसु धर्मप्रामाण्यमव्याहतम् । स्मृत्युक्तत्वादष्टकादीनामनुष्ठानमवश्यं कर्त्तव्यम् । माघकृष्णाष्टम्यां पितृनुद्दिश्य क्रियमाणं कर्माष्टकाशब्देनोच्यते। 'अष्टका कर्त्तव्या' इति स्मृतिवचनेन अष्टकाख्यं कर्म विधीयते ।

अत्र 'अष्टका: कर्त्तव्या' इति स्मृतिरियं प्रमाणमप्रमाणं वा इति संशये जाते अष्टकादिस्मृति-वचनस्य वेदमूलकत्वात् तत् प्रमाणमिति सिद्धान्तितम् । अष्टकाविषये मूलश्रुतिवचनं यथा -

'यां जना: प्रतिनन्दन्ति रात्रिं धेनुमिवायतीम् ।
संवत्सरस्य या पत्नी स नो अस्तु सुमङ्गली ।।
अष्टकायै सुराधसे स्वाहा ।।'इति।

अस्यार्थवादवाक्यं यथा -

'एषा वै संवत्सरस्य पत्नी यदेकाष्टका ।'इति।

एवञ्च अष्टकादिस्मृतीनां वेदमूलकत्वात् प्रामाण्यं स्वीकर्त्तव्यमेव । किन्तु श्रुतिस्मृत्योर्मध्ये यत्र विरोध: स्यात्तत्र स्मृतेरप्रामाण्यं भवेत् । एतच्चोदाहरणमुखेन प्रदर्शयति । उदाहरणं यथा - 'औदुम्वरी सर्वा वेष्टयितव्या' इति। ज्योतिष्टोमे सदोनामकस्य मण्डपस्य मध्ये काचित् औदुम्वरी शाखा निखन्यते । तस्याश्च शाखाया: वस्त्रेण वेष्टनं कर्त्तव्यमिति स्मृतिवचनेन कथ्यते । तत्रायं संशयो भवति यदियं सर्ववेष्टनस्मृति: प्रमाणमप्रमाणं वा ? तत्र पूर्वपक्षी वदति - इयं स्मृति: वेदमूलकत्वादष्टकादिस्मृतिवत् प्रमाणं भवति । तत्र सिद्धान्ती कथयति - सर्ववेष्टनस्मृतिवाक्यमप्रमाणम् । यतो हि 'औदुम्वरीं स्पष्ट्वोद्गायेत्' इति उदाहरणेन ज्ञायते यत् औदुम्वरीशाखाया: स्पर्शं कृत्वा उद्गातासंज्ञक: ऋत्विक् सामगानं कुर्यादिति प्रत्यक्षपठितेन वेदवाक्येन औदुम्वरीशाखाया: स्पर्शो विधीयते । यदि स्मृतिवचनानुरोधेन शाखाया: सर्ववेष्टनं क्रियते चेत् तस्या: शाखाया: स्पर्शो न संभवति । अत: प्रत्यक्षश्रुतिविरुद्धत्वादियं सर्ववेष्टनस्मृतिरप्रमाणमेव । एवं च निर्मूलत्वादियं स्मृतिरप्रमाणमेव ।

अपरमुदाहरणं प्रदर्शयति । यथा - 'वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णाति' इति स्मृतिरपि अप्रमाणम् । सोमयागेऽवान्तरदीक्षाविसर्जनप्रसङ्गे क्रियमाणहोमावसरे यजमानं पत्नीं पुत्रांश्च भ्रातृंश्च अहतेन वाससा प्रच्छाद्य वाससोऽन्ते स्रुग्दण्डमुपनिबध्य जुहोति । यजमानपरिवाराच्छादकं वस्त्रं वैसर्जनहोमीयं वास: इत्युच्यते । इयं स्मृति: यद्यपि प्रत्यक्षश्रुतिविरुद्धा नास्ति, तथापि अस्या: स्मृते: लोभमूलत्वादप्रामाण्यं निश्चीयते । अत: प्रत्यक्षश्रुत्या बाधाभावेऽपि मूलभेदात् नेयं स्मृति: प्रमाणम् । दृष्टश्चात्र मूलभूतो हेतु: लोभ एव । तत एव स्मृत्युपपत्ते: । एवं च श्रुतिविरुद्धं दृष्टकारणं च स्मरणमप्रमाणम् ।

तथैव शिष्टानामाचारोऽपि स्मृतिद्वारा श्रुतिमूलकत्वात् प्रमाणम् । किन्तु मातुलकन्याविवाह-तुल्या: शिष्टाचारास्तु अप्रमाणम् । यतो हि 'मातुलस्य सुतामुद्वा' इत्यादि शातातपस्मृतिवचनेन तादृशाचारस्य निषिद्धत्वात् स्मृतिविरुद्धत्वम् । एवञ्च स्मृतिविरुद्ध: शिष्टाचार: अप्रमाणमिति ज्ञातव्यम् । अनेन प्रकारेण श्रुति - स्मृति - शिष्टाचाराणां च धर्माधर्मयो: प्रामाण्यं व्यवस्थितम् ।

स्वानुशीलनप्रश्नाः
१) कानि धर्मप्रमाणानि ?
उत्तरं- ........................................
२) संवत्सरस्य पत्न्याः नाम किम् ?
उत्तरं- ..........................................
३) कीदृक् शिष्टाचारः धर्मनिमित्तं प्रमाणम् ?
उत्तरं- ................................................

## ५.४. कर्मभेदनिरूपणम्

इदानीं कर्मभेदकप्रमाणानां निरूपणार्थमुपक्रमते । कर्मात्र धर्मनाम्नोच्यते । प्राग्निरूपितो धर्मः परस्परं भिन्नः । धर्मस्य भेदकप्रमाणानि शब्दान्तर - अभ्यास - संख्या - संज्ञा - गुणनामधेय - प्रकरणानि षट्संख्यकानि भवन्ति ।

### १) शब्दान्तरात् कर्मभेदनिरूपणम् -

तथाहि याग - दान - होमानां 'यजति - ददाति- जुहोति'इति असमानार्थकशब्दैः प्रतिपादितत्वात् तेषां शब्दान्तरात् कर्मभेदो भवति । ज्योतिष्टोमयागे क) सोमेन यजेत, ख) हिरण्यमात्रेयाय ददाति, ग) दाक्षिणानि जुहोति' इति त्रिषु वाक्येषु निरूपिताः यागदानहोमाः प्रतिपादिताः सन्ति। तत्र शब्दान्तराख्येन प्रमाणेन यागदानहोमाः परस्परं भिन्नाः भवन्ति । स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनं दानमिति दानपदार्थः ।

### २) अभ्यासात् कर्मभेदनिरूपणम् -

अभ्यासाख्यं कर्मभेदकप्रमाणं दर्शयितुमारभते । अत्रोदाहरणं यथा 'समिधो यजति' इति । अत्रापराणि चत्वारि वाक्यानि यथा - 'तनूनपातं यजति', 'इडो यजति', 'बहिर्यजति', 'स्वाहाकारं यजति' इति । एतेषु पञ्चसु वाक्येषु एकस्य वाक्यस्य कर्मविधायकत्वे इतरेषां तत्र कर्मणि गुणविधायकत्वे नियामकप्रमाणाभावेन सर्वाण्यपि पञ्चवाक्यानि कर्मविधायकानि भवन्ति । एवं सति एकवारं विहितस्य कर्मणः पुनर्विधानं व्यर्थं स्यात् । अतः पुनर्विधानसामर्थ्यात् पूर्ववाक्येन विहितात् कर्मणः सकाशादपरेण वाक्येन विहितं यत् कर्म तदवश्यं भिन्नमिति सिद्ध्यति । अतः एतादृशेषु स्थलेषु अविशेषपुनःश्रुतिरूपात् यजतिपदाभ्यासात् कर्मभेदो भवति । यजतिपदस्य पुनरुक्त्याऽभ्यासेन वा कर्मभेदो भवति । तस्मात् पञ्चभिर्वाक्यैर्विहितानि पञ्चकर्माणि परस्परं भिन्नानीति ज्ञातव्यम् ।

### ३) संख्यया कर्मभेदनिरूपणम् -

संख्ययाऽपि कर्मभेदो भवति। उदाहरणं यथा - 'तिस्र आहुतीर्जुहोति' इति । अस्मिन् वाक्ये जुहोतिपदस्य अभ्यासात्मकपुनरुक्त्यभावेऽपि होमार्थकेन जुहोतिपदेन सह

त्रित्वसंख्याया अन्वयात् परस्परं भिन्नाः 'त्रयो होमाः' इत्यर्थो भवति । अतः संख्यासंज्ञकेन प्रमाणेनात्र कर्मभेदो जायते ।

## ४) संज्ञया कर्मभेदनिरूपणम् –

संज्ञयाऽपि कर्मभेदो भवति । उदाहरणं यथा – 'अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरनेन सहस्रदक्षिणेन यजेत' इति । अनेन वाक्येन ज्योतिः- विश्वज्योतिः- सर्वज्योतिसंज्ञकानां त्रयाणां यागानां ज्योतिष्टोमप्रकरणे पाठे सत्यपि ज्योतिष्टोमसंज्ञात्रयापेक्षया उक्तानां त्रयाणां यागानां पृथक्संज्ञाकरणात् ज्योतिष्टोमसंज्ञकाद् यागात्तेषां भेदः । एवं च पृथक्संज्ञावशादेतेषां त्रयाणां परस्परं भेदो जायते । तेनात्र संज्ञया कर्मभेदः ज्ञातव्यः ।

## ५) गुणात् कर्मभेदनिरूपणम् –

गुणवशादपि कर्म भिद्यते । तस्योदाहरणं यथा – 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इति । वाक्येऽस्मिन् 'सा वैश्वदेव्यामिक्षा' इति वाक्यमामिक्षा – विश्वदेवयोरर्थात् द्रव्यदेवतयोः सम्बन्धेनानुमितस्य यागस्य विधायकमस्ति । तथैव 'वाजिभ्यो वाजिनम्' इति वाक्येन 'वाजिदेवताकस्य वाजिनद्रव्यकस्य च कस्यचित् यागान्तरस्य विधानं क्रियते । तेन विश्वदेवदेवतासम्बन्धानुमितः पूर्वविहिते वैश्वदेवसंज्ञके यागे वाजिनद्रव्यात्मकस्य गुणस्य विधानं न सम्भवति। यतो हि पूर्वविहितो वैश्वदेवाख्यो यागः आमिक्षाख्येन गुणेन अवरुद्धः। तेन तत्र यागे वाजिनाख्यगुणस्य सन्निवेशो न भवितुमर्हति । व्रीहियववदत्र विकल्पोऽपि न संभवति । यतो हि वाजिनाख्यद्रव्यस्य आमिक्षाख्यद्रव्यस्य च समानबलत्वं नास्ति । द्वयोर्विषमशिष्टयोः प्रबलदुर्बलपदार्थयोर्विकल्पो नैव भवति । विकल्पस्तु समशिष्टयोरेव भवति । वैश्वदेवयागस्योत्पत्तिवाक्ये एव आमिक्षाख्यो गुणः विहितत्वात् स उत्पत्तिवाक्यशिष्टोऽस्ति ।

'सा वैश्वदेव्यामिक्षा' इति वैश्वदेववाक्यादुत्पन्ने विहिते कर्मणि, केनचिदन्येन वाक्येन विहितः यो वाजिनगुणः, स उत्पन्नशिष्टः अर्थात् उत्पन्नवाक्यविहितोऽस्ति । उत्पत्तिशिष्टोत्पन्नशिष्टयोर्मध्ये उत्पत्तिशिष्टः प्रबलः। यतो हि सः कर्मोत्पत्तिवेलायामेव कर्माङ्गत्वेन विज्ञायते। उत्पन्नशिष्टो वाजिनगुणः अनन्तरं ज्ञातोऽपि विलम्बितत्वेन दुर्बलो भवति। तेन तस्य वैश्वदेवयागे निवेशमलभमानत्वात् वाजिरूपदेवतान्तरेण सहसम्बध्यते। 'वाजिभ्यो वाजिनम्' इति वाक्येन पूर्वोक्ताद् वैश्वदेवयागाद् वाजिनयागो भिन्न इति ज्ञायते। 'वाजिभ्यो वाजिनम्' इति वाक्यं गुणप्रमाणबलेन कर्मान्तरस्य विधानं करोति। एवं चात्र गुणात् कर्मभेद इति विज्ञेयम्।

## ६) प्रकरणात् कर्मभेदनिरूपणम् –

प्रकरणादपि कर्म भिद्यते । उदाहरणं यथा – कुण्डपायिनामयननामके सत्रयागे श्रूयते 'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति' इति । अस्मिन् सत्रप्रकरणे उपसत्संज्ञकं कर्म कृत्वा मासं यावदग्निहोत्रकर्मणः अनुष्ठानं कर्त्तव्यम् । अस्य वाक्यस्य सन्निधौ

किमपि कर्म पूर्वं न प्रतिपादितम् । तेनापूर्वकर्मसन्निधानात्मकेन प्रकरणान्तरेण प्रसिद्धस्याग्निहोत्रकर्मणः धर्मैर्युक्तमन्यदेव
अग्निहोत्रसंज्ञकं कर्म अनेन वाक्येन विधीयते । अत्र 'उपसत्...' वाक्येन 'यावज्जीवमग्निहोत्रं जुहोति' इति वाक्यप्रसिद्धमग्निहोत्रसंज्ञकं कर्म अनूद्य गुणः न विधीयते। यतो हि प्राप्ते कर्मणि उपसद्यागानन्तरत्वमित्येकस्य गुणस्य मासात्मककालत्वमित्यपरस्य गुणस्य विधाने अनेकगुणविधानात्मको वाक्यभेदाख्यो दोषः समुत्पद्यते भिन्नप्रकरणपठितत्वात् । अत्र प्रकरणाख्येन प्रमाणेनात्र कर्मभेदो भवति । प्रसिद्धाग्निहोत्रं हि नित्याग्निहोत्रं भवति । एवं च प्रकरणान्तरमेव अत्र कर्मभेदस्य कारणमित्युच्यते । तदेवं शब्दान्तर - अभ्यास - संख्या - संज्ञा - गुण - प्रकरणान्तरैः कर्मभेदः स्वीक्रियते ।

स्वानुशीलनप्रश्नाः
१) दानस्य किं स्वरूपम् ?
उत्तरं- ..............................................
२) धर्मभेदकप्रमाणानि कतिसंख्यकानि ?
उत्तरं- ................................................
३) वैश्वदेवाख्यो यागः केन गुणेनावरुद्धः ?
उत्तरं- .................................................

## ५.५. प्रमेयादिविचारः

वेद - स्मृति -शिष्टाचारैः प्रतिपादितोऽर्थः त्रिविधो भवति । यथा - १) क्रत्वर्थः, २) पुरुषार्थः, ३) उभयार्थश्चेति ।

**१) क्रत्वर्थः** - तत्र प्रयाजादिकं केवलं क्रत्वर्थः ।

**२) पुरुषार्थः** - फलं तत्साधनं च पुरुषार्थः । यथा - स्वर्गादिः, ज्योतिष्टोमादिश्च ।

**३) उभयार्थः** - दध्यादि तु उभयार्थमस्ति । यतो हि - 'दध्ना जुहोति' इति वाक्यं फलेनासंयुक्तमस्ति । अतः दधि क्रत्वर्थम् । तथैव 'दध्नेन्द्रियकामस्य जुहुयात्' इति वाक्येन दध्नः फलार्थत्वेन विधानात् पुरुषार्थत्वमपि अस्ति । तदुक्तम् - एकस्य तूभयत्वे संयोगपृथक्त्वम्' इति । यदा एक एव पदार्थः उभयार्थी भवति, तदा स संयोगपृथक्त्वन्यायस्य विषयो भवति । संयोगपृथक्त्वं नाम वाक्यभेदः। सः वाक्यभेदः एकस्य पदार्थस्य उभयार्थत्वे नियामको भवति ।

प्रयाजादयः क्रत्वर्थाः भवन्ति । यतो हि तेषां प्रयोजकः क्रतुरस्ति । ज्योतिष्टोमादयः पुरुषार्थाः भवन्ति । यतो हि तेषां प्रयोजकं फलं भवति ।

यद् विधिवाक्यं यस्मै प्रयोजनाय यत् कर्मानुष्ठापयति तत्प्रयोजनमेव तस्य कर्मणः प्रयोजकं भवति । उदाहरणं यथा - 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति । अयं

विधि: स्वर्गप्रयोजनाय दर्शादिकर्म अनुष्ठापयति । तेन स्वर्गादिप्रयोजनमेव दर्शादिकर्मणां प्रयोजको भवति । प्रयाजाद्यङ्गकर्मविधि: दर्शादिकर्म निष्पादनार्थं प्रयाजाद्यङ्गकर्म अनुष्ठापयति । तेन दर्शादिकर्म प्रयाजाद्यङ्गकर्मणां प्रयोजकं भवति । 'तप्ते पयसि दध्यानयति' इति दध्यानयनविधि: आमिक्षार्थं दध्यानयनमनुष्ठापयति । न तु वाजिननिमित्तं दध्यानयनं क्रियते । यतो हि आमिक्षार्थं दध्यानयने सति वाजिनद्रव्यं स्वत: सिद्ध्यति । अत: दध्यानयने आमिक्षा एव प्रयोजिका भवति ।

अपरमुदाहरणं प्रदर्शयति । यथा - 'पुरोडाशकपालेन तुषानुपवपति' इति । पुरोडाशकपालेन तुषाणां निष्कासनं कुर्यादिति वाक्येन पुरोडाशकपालं तुषोपवापाङ्गत्वेन विहितमस्ति । अर्थात् पुरोडाशकपालं तुषोपवापस्याङ्गमस्ति । तथापि तुषोपवपनं, पुरोडाशकपालस्य प्रयोजकं न भवति । यतो हि पुरोडाशार्थं गृहीतेनैव कपालेन तुषोपवापस्य सिद्धिर्भवति । अत: पुरोडाश एव कपालस्य प्रयोजक इति बोद्धव्यम् ।

स्वानुशीलनप्रश्नाः
१) संयोगपृथक्त्वं नाम किम् ?
उत्तरं- ..................................................
२) ज्योतिष्टोमादय: क्रत्वर्था: पुरुषार्था: वा ?
उत्तरं- ..................................................
३) कपालस्य क: प्रयोजक: ?
उत्तरं- ..................................................

## ५.६. क्रमविचार:

कर्मणामनुष्ठानक्रमस्य निरूपणात् पूर्वमियमाशङ्का भवति यत् विधिवाक्येन साङ्गं प्रधानं कर्म कर्त्तव्यत्वेन प्रतिपाद्यते । तत्र अङ्गकर्मणां प्रधानकर्मणां च बहुत्वात् तानि क्रमेणैवानुष्ठितानि स्यु: । अतस्तद्विषये क्रमनियामकं प्रमाणं किमिति शङ्का जायते ।

**समाधानम् –** एवं विधा शङ्का न कर्त्तव्या । श्रुत्यादीनि षट् प्रमाणान्येव क्रमनिर्द्धारकाणि सन्ति । तानि यथा श्रुति - अर्थ - पाठ - स्थान - मुख्य - प्रवृत्त्याख्यानि । तेषां विचार: इदानीं क्रियते ।

**१) श्रौतक्रम: –** श्रौतक्रमस्योदाहरणं यथा - 'अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति' इति । वाक्येऽस्मिन् क्त्वाश्रुति: अस्ति । तद्बलात् गृहपते: दीक्षानन्तरं ब्रह्मण: दीक्षा कर्त्तव्येति श्रौतक्रम: ।

**२) अर्थक्रम: –** अर्थक्रमस्योदाहरणं यथा - 'अग्निहोत्रं जुहोति यवागूं पचति' इति । अत्र यवागूपाक: होमार्थ: । तेन यवागूपाकात् पूर्वमग्निहोत्रहोमस्य कर्त्तुमशक्यत्वात् पाठक्रमं त्यक्त्वा अर्थक्रम: स्वीकरणीय:। अर्थ: नाम प्रयोजनम् । प्रयोजनानुसारं पूर्वं यवागूपाक: तदनन्तरमग्निहोत्रहोम: आर्थक्रमबलेन क्रियते ।

**३) पाठक्रम: –** पाठक्रमस्योदाहरणं यथा – 'समिधो यजति', 'तनूनपातं यजति' इति । अत्र विधिवाक्यानां यादृशेन क्रमेण पाठ:, तेनैव क्रमेण समिदादियागानामनुष्ठानं कर्त्तव्यम् । अयं भवति पाठक्रम: ।

**४) स्थानक्रम: –** ज्योतिष्टोमयागे औपवसथ्यदिनादारभ्य क्रमशोऽनुष्ठेयानामग्नीषोमीय – सवनीय – अनुबन्ध्यसंज्ञकानां त्रयाणां पशूनां साद्यस्क्रसंज्ञके सोमयागे 'सह पशूनालभते' इति वाक्येन एकस्मिन्नेव कालेऽनुष्ठानं कर्त्तव्यमिति साहित्यं प्रतीयते । तत्साहित्यं च सवनीयस्य पशो: स्थाने विहितमस्ति। तत्र प्रकृतिभूतज्योतिष्टोमयागगतं क्रमं त्यक्त्वा सवनीयस्य पशो: स्थाने साहित्यविधानात् प्रथमं सवनीयस्य पशोरुपाकरणं, तदनन्तरमग्नीषोमीयस्य पशोरुपाकरणं, तदनन्तरमनुबन्ध्यस्य पशोरुपाकरणमिति क्रम: स्थानक्रमप्रमाणेनावगन्तव्य: । अयमाशय: – यागपूजितदेवता: यागात् पूर्वस्मिन् दिवसे यजमानस्य गृहमागत्य निवसन्ति । तासां देवतानां स्थितिरूपो निवास: उपवसथशब्देनोच्यते । तद्योगो दिवस: औपवसथ्य: । ज्योतिष्टोमयागस्य प्रधानदिने आश्विनग्रहस्य ग्रहणानन्तरं सवनीय: पशुर्विहितोऽस्ति । तस्मात् पूर्वदिने औपवसथ्यदिवसे दीक्षासम्बन्धितस्य अग्नीषोमीयस्य पशो: विधानमस्ति । सवनीयस्य पशोरनन्तरमनुबन्ध्यस्य पशोर्विधानमस्ति । तत्र त्रयाणां पशूनां संस्कार: सवनीयपशोर्देशे एव कर्त्तव्योऽस्ति । अत्र प्रथममौपवसथ्यस्याग्नीषोमीयस्य वा, तत: सवनीयस्य तत: अनुबन्ध्यस्येति स्थानक्रमानुसारमवगन्तव्यम् ।

**५) मुख्यक्रम: –** दर्शयागे शाखाच्छेदनादीनां सान्नाय्यधर्माणां पूर्वं निर्वापादीनामाग्नेयधर्माणां चानन्तरं प्रवृत्तौ सत्यामपि मुख्ययो: आग्नेययाग – सान्नाय्ययागयोर्मध्ये आग्नेययागस्य पूर्वमनुष्ठानात् मुख्ययागक्रमेण प्रथमत: आग्नेयपुरोडाशस्य प्रयाजशेषाभिघारणम्, तदनन्तरं दुग्धस्याभिघारणमिति मुख्ययागक्रमात् अभिघारणक्रमो व्यवस्थित: ।

**६) प्रवृत्तिक्रम: –** प्रवृत्तिक्रमस्योदाहरणं यथा – 'सप्तदश प्राजापत्यान् पशूनालभते' इत्यत्र सप्तदशपशुरूपद्रव्येण युक्ता: प्रजापतिदेवताका: सप्तदशयागा: कर्त्तव्या इति विधीयते । प्राजापत्ययागे सप्तदशपशवो विधीयन्ते । तेषां पशूनां च देवता भवति प्रजापति: । सप्तदशपशूनां कृते तत्र सप्तदशयागा: भवन्ति । तत्र पशो: यूपे नियोजनाख्य: संस्कार: एक:, तस्य प्रोक्षणाख्य: संस्कार: द्वितीय:, पिपासाशमनार्थं जलदानाख्य: संस्कार: तृतीय:, जुहूपात्रेणाञ्जनकरणाख्य: संस्कार: चतुर्थ:, पर्यग्निकरणाख्य: संस्कार: पञ्चम:, विशसनाख्यसंस्कार: षष्ठ: इत्यादि क्रमेण सप्तसंस्कारा: अनुष्ठीयन्ते । तत्र प्रथम: उपाकरणाख्य: पशुसंस्कार: यस्मात् कस्मादपि पशोरारभ्य यस्मिन् कस्मिन्नपि पशौ समापनीय:। किन्तु यूपबन्धनात्मक-नियोजनादय: संस्कारास्तु येन क्रमेणोपाकरणमनुष्ठितं तेनैव क्रमेण अनुष्ठेया: । कथमिति चेत् ?

उच्यते – अग्नीषोमीययागात्मकप्रकृतियागेऽग्नीषोमीयाख्य: पशुरेक एवास्ति । तस्यैकस्य पशो: प्रथमत: उपाकरणं कृत्वा द्वितीयक्षणे एव नियोजनाख्य: संस्कार:,

तृतीयक्षणे एव प्रोक्षणाख्य: संस्कार: क्रियते। यतस्तत्र व्यवधानकरणार्थं किमपि निमित्तं द्वितीय: पशुर्वा नास्ति । किन्त्वत्र प्राजापत्ययागात्मक-विकृतियागे तु सप्तदशपशूनां सहानुष्ठेयवचनात् प्रथमत: यस्य कस्यापि पशोरुपाकरणं कर्त्तव्यत्वेन स्वसम्बन्धितानां नियोजनादि संस्काराणां कृते षोडशभि: क्षणैर्व्यवधानं सहते, न तु अधिकै: । उपाकरणक्रमेण नियोजनादय: संस्काराश्चेत् नानुष्ठीयन्ते तर्हि षोडशक्षणाधिकक्षणव्यवधानं स्यात्, तच्च शास्त्रानुमतं न भवेत्। अत: उपाकरणसमये य: पशु: द्वितीयोऽस्ति, स एव नियोजनसमयेऽपि द्वितीय एव भाव्य: । अयमाशय: सप्तदशपशूनामुपर्युक्ता: सप्तसंस्कारा: प्रथमतोऽनुष्ठितेन क्रमेणैव कर्त्तव्या: । सप्तसंख्यकेषु पशुसंस्कारेषु प्रथम: संस्कार: क्रमश: सर्वेषां पशूनां कर्त्तव्य: । तत: द्वितीयोऽपि संस्कार: तेनैव क्रमेण । तत: तृतीयोऽपि तेनैव क्रमेण । एवं सप्तसंस्कारा: पूर्वानुष्ठितक्रमेणैव कर्त्तव्या: । अनया रीत्या प्रथमपशोरुपाकरणानन्तरमन्येषां षोडशपशूनामुपाकरणे षोडशक्षणात्मक: कालो व्यतीतो भवति । तदनन्तरं सप्तदशक्षणे प्रथमपशोरेव नियोजनं कर्त्तव्यम् । तत: इतरेषां पशूनामपि। तदनन्तरं सप्तदशक्षणे तस्यैव प्रथमपशो: तृतीय: संस्कार: कर्त्तव्य: । अयं प्रवृत्तिक्रम: उच्यते ।

अनेनैव प्रकारेण श्रुतिक्रम - अर्थक्रम - पाठक्रम - स्थानक्रम - मुख्यक्रम - प्रवृत्तिक्रमैश्च विचार्य कर्मानुष्ठानं विधीयते । अविचार्यान्यथाऽनुष्ठाने कर्मणि वैगुण्यमागच्छेत् । विगुणं च कर्मफलं दातुं न प्रभवेत् । इति ।

स्वानुशीलनप्रश्नाः

१) अर्थक्रमस्य किमुदाहरणम् ?

उत्तरं- ....................................................

२) उपवसथशब्दस्य कोऽर्थ: ?

उत्तरं- ..................................................

३) प्राजापत्ययागे कति पशव: प्रयुज्यन्ते ?

उत्तरं- ................................

## सारांशः

अस्मिन् पाठ्यांशे प्रतिपादितविषयाणामयमेव सारो भवति । वेदानन्तरं स्मृतिग्रन्था: धर्मनिमित्तं प्रमाणभूता: भवन्ति । अष्टकादिस्मृतीनां वेदमूलकत्वात् प्रामाण्यं स्वीक्रियते । शिष्टाचारोऽपि स्मृतिद्वारा श्रुतिमूलकत्वात् प्रमाणम् । धर्मस्य भेदकप्रमाणानि शब्दान्तर - अभ्यास - संख्या - संज्ञा - गुण - प्रकरणानि षट्संख्यकानि स्वीकृतानि सन्ति । वेद - स्मृति - शिष्टाचारै: प्रतिपादितोऽर्थ: त्रिविधो भवति । ते च भवन्ति यथा - क्रत्वर्थ - पुरुषार्थ - उभयार्थाश्च । विधिवाक्येन साङ्गं प्रधानं कर्म कर्त्तव्यत्वेन प्रतिपाद्यते। अङ्गकर्मणां प्रधानकर्मणां च बहुत्वात् तानि

क्रमेणैवानुष्ठेयानि स्युः । क्रमनिर्द्धारकाणि षट् प्रमाणानि भवन्ति। यथा – श्रुति – अर्थ – पाठ – स्थान – मुख्य – प्रवृत्त्याख्यानि ।

## पारिभाषिकशब्दाः

१) यागः – देवतामुद्दिश्य क्रियमाणो द्रव्यत्याग इति यागपदार्थः ।
२) होमः – देवतामुद्दिश्य प्रक्षेपात्मकं कर्म होमपदार्थः ।
३) आमिक्षा – तप्ते पयसि दधिमिश्रणानन्तरं धनीभूतं पय आमिक्षा इत्युच्यते ।
४) नैयमिकम् – नित्यम् ।
५) कुण्डपायिनामयनं – संवत्सरसाध्यं सत्रम् ।
६) प्रयोजकत्वं – अनुष्ठापकत्वम् ।

**सहायकग्रन्थाः**

१) मीमांसापरिभाषा – श्रीकृष्णयज्वविरचिता, साहित्य भण्डार, सुभाष बाजार, मेरठ, उत्तरप्रदेश ।
२) मीमांसापरिभाषा – श्रीकृष्णयज्वविरचिता – कृष्णदास एकाडेमी, वाराणसी, १९८७
३) अर्थसंग्रहः – लौगाक्षिभास्करप्रणीतः ।

## आदर्शप्रश्नाः

### क. निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः)

१) धर्मस्य भेदकप्रमाणानि सोदाहरणं प्रतिपादयत ।
२) प्रधानाङ्गकर्मणां क्रमान् प्रतिपाद्य प्रवृत्तिक्रमं विचारयत ।

### ख. विश्लेषणात्मकप्रश्नाः (प्रत्येकं १५/१० अङ्काः)

१) स्मृतिप्रामाण्यं विचारयत ।
२) गुणवशात् कर्मभेदं निरूपयत ।
३) प्रकरणात् कर्मभेदं विचारयत ।
४) प्रमेयादिविचारं कुरुत ।
५) स्थानक्रमं विशदं विवेचयत ।

### ग. लघुप्रश्नाः (प्रत्येकं ५ अङ्काः)

१) शिष्टाचारस्य धर्मे प्रामाण्यमालोचयत ।
२) शब्दान्तरात् कर्मभेदं निरूपयत ।
३) संज्ञया कर्म कथं भिद्यते ?
४) प्रमेयादिविचारे उभयार्थस्य सोदाहरणं विवेचनं कुरुत ।
५) मुख्यक्रमं सोदाहरणं विचारयत ।
६) अर्थक्रमं सोदाहरणमालोचयत ।
७) संख्यया कर्मभेदं विचारयत ।

## घ. एकाङ्कप्रश्नाः (प्रत्येकमेकाङ्कः)

१) माघकृष्णाष्टम्यां पितृनुद्दिश्य क्रियमाणं कर्म केन शब्देनोच्यते ?

२) औदुम्वरीशाखां स्पृष्ट्वा कः सामगानं कुर्यात् ?

३) द्रव्यदेवतयोः सम्बन्धेन किमनुमीयते ?

४) वेदस्मृतिशिष्टाचारैः प्रतिपादितोऽर्थः कतिविधः ?

५) धर्मभेदकप्रमाणानि कतिसंख्यकानि ?

६) आमिक्षाद्रव्यस्य देवतायाः नाम किम् ?

७) पुरोडाशकपालं कस्याङ्गम् ?

८) अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं  दीक्षयति' इति विधिवाक्ये कः क्रमो भवति ?

९) अग्नीषोमीय- सवनीययोर्मध्ये कस्य प्रथमानुष्ठानं भवति ?

१०) प्राजापत्यपशोरालम्भने कति संस्काराः अनुष्ठीयन्ते ?

## एकाङ्कस्योत्तराणि –

१) अष्टकाशब्देन,

२) उद्गातासंज्ञकः ऋत्विक्,

३) यागः,

४) त्रिविधः,

५) षट्संख्यकानि,

६) विश्वेदेवः,

७) तुषोपवापस्य,

८) श्रौतक्रमः,

९) अग्नीषोमीयस्य,

१०) सप्तसंस्काराः।

*******